CC-0. Digitized by eGangotri and MIDF- Delhi

हैमवती

महेन्द्रसँस्कृतविश्वविद्यालयः

बेलझुण्डी, दाङ् नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमवती

महेन्द्रसंस्कृत–विश्वविद्यालयानुसन्धान–पत्रिका

२०४७ श्रावण मासे द्वितीयोऽङ्कः

सम्पादकमण्डलम्

प्राचार्य डा. श्री हरिप्रसाद आचार्य प्रधान सम्पादकः

सह. प्रा. श्री रामेश्वर शर्मा सम्पादकः

उप–प्रा. श्री लेखनाथ आचार्य ,,

उप–प्रा. श्री स्थानेश्वर गौतम ,,

उपप्रा. श्री लोकमणि देवकोटा ,,

सहायकप्रशासकः- श्री हरिहर शर्मा अधिकारी कार्यकारिसम्पादकः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

शिक्षाध्यक्षस्यकार्यालयः

बेलझुण्डी दाङ, नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमवत्या-नियमाः

१) हैमवती महेन्द्र–संस्कृत–विश्वविद्यालय–सञ्चालिता अनुसन्धानात्मक (जर्नल) पत्रिका ।
२) अस्यां पत्रिकायां संस्कृतभाषायामेव लेखाः प्रकाशिष्यन्ते ।
३) हैमवत्यां प्रकाशितानां लेखानामुत्तरदायित्वं रचयितुरेव भविष्यति ।
४) हैमवत्यां प्रकाशनाय प्रहितैर्लेखैरस्या उद्देश्यानुकुलैः पत्राणामेकस्मिन्नेवपृष्ठे लिखितैः स्फुटाक्षरैश्च भाव्याम् ।

हैमवत्या-उद्देश्यम्

वर्तमानानां नैपालकानां संस्कृतविदुषाम् , अनुसन्धानात्मिकानां कृतीनाम् प्राचीनानां नैपालकानां विदुषाम् अप्रकाशितानाम् महत्त्वपूर्णानां संस्कृतग्रन्थानाम् अन्यत्राऽप्राप्याणां नैपालकेषु सङ्ग्रहालेषूपलभ्यमानानां संस्कृतग्रन्थानाम् , प्राचीनार्वाचीन-संस्कृतानुरागि-संस्कृतविद्वज्जीवन-चरित्राणाम्, श्रेष्ठानां काव्यादिकृतीनां , संस्कृत क्षेत्रसम्बद्धानां क्रियाकलापानाञ्च, प्रकाशनेन सस्कृत वाङमय परिचय प्रदानम् , संस्कृतेऽनुसन्धामात्मकस्य रचनात्मकस्य च कार्यस्य प्रोत्साहनञ्च हैमवत्या उद्देश्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूचि

१– सूर्यतत्त्वम् — श्री विष्णुप्रसाद न्यौपाने – १

२– आन्वीक्षिकी धर्मनिर्णय प्रयोजिका — श्री दीर्घराज घिमिरे – १०

३– बेद: अतिमहत्वपूर्णज्ञान– ज्योतिरस्ति — श्री छविलाल पोखरेल – १६

४– कवि समयस्थापनायावृतम् — श्री रोहिणीवल्लभ शर्मा पोख्रेल: – २४

५– कार्यकारणभावसम्बन्ध: — गिरिधर शरण शर्मा – ३०

६– श्राद्धविमर्श: — डा. श्री भोजराजपन्त: – ३३

७– स्थान्यादेशयोर्वाचकत्व–विमर्श: — विष्णुप्रसाद शर्मा देवकोटा – ३९

८– श्रावणीकर्म — केशवराज शर्मा आचार्य: – ४७

९– वेदान्तविनोद: — दामोदर शर्मा – ५४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादकीयम्

पौरस्त्य सिद्धान्तानुसारं मानव जीवनस्य चरममुद्देश्यं यद्यपि मोक्षावाप्तिः। तथापि ज्ञान विज्ञान समन्वयात्मक शिक्षाश्रयिणि जगति सुखक्षेत्राणि अपराविद्यान्तर्गतानि आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकञ्चेति त्रीणि भवन्ति । पुरातने वैदिके काले एतेषां त्रयाणामेव सुखानां प्राप्तिः शिक्षाया उद्देश्यमासीत् । ऋषिकुलेषु महर्षयश्छात्रेभ्य उपर्युक्तामुद्देश्यत्रयात्मिकमेवशिक्षां ददतिस्म । गुरूकुलेभ्यः शिक्षां लब्ध्वा छात्रा मानवजीवनस्य पूर्णसुखायाधीतां विद्यां परीक्षमाणा प्रयुञ्जतेस्म ।

परं कालक्रमेण सर्वाङ्गपूर्णा प्राच्यशिक्षापद्धतिः किञ्चित् क्षीणतां गता । तस्याः स्थानं पाश्चात्यशिक्षया गृहीतम्। परन्त्वस्माकं राष्ट्रस्य विकासः संस्कृत-शिक्षामाध्यमेनैव भवितुंशक्नोतीति विचार्य विश्वस्य ज्ञानकेन्द्रत्वेन नेपाल–राष्ट्रस्य विकासार्थं महेन्द्र-संस्कृत-विश्वविद्यालयस्य स्थापना जाता । अतोऽयं–विश्वविद्यालयःसंस्कृतवाङ्मयस्य विकासाय विविध क्षेत्रेषु कार्यक्रमाणां प्रस्तुतिं कार्यान्वियनश्च कुर्वन्नास्ति ।

अतएव वर्तमानसमयेऽपि पुरातनकालादेव समाजस्य हिताय प्रवृत्तायाः संस्कृतशिक्षाया माध्यमेनैव नैपालकानां जनानां विकासः समुन्नतिश्च भवतीति निदर्शनाय विदुषां प्रायासैर्भाव्यम् ।

अन्ते प्रस्तुताङ्क प्रकाशने सहयोगिनो विद्वांसः, मुद्रकसहयोगिनः कर्मकारश्च धन्यवादार्हा इति साधुवादप्रदानपुरः सरं पुनर्हैमवत्या अङ्कान्तरप्रकाशनाय सर्वेषां सहयोगमाशास्महे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूर्यतत्त्वम्

प्रा. विष्णु प्रसाद न्यौपाने ☫

जगदेकचक्षुर्भगवान् भास्करः सनातनधर्मावलम्बिनामेकः परमाराध्यो देवः । यूरोपामेरिकादि देशेषु स्थिताम्लेच्छा अपि (सन्–गड्=सूर्यदेव इति) ईश्वर दृष्टया सूर्यमुपासन्ते । सूर्योपनिषदि वर्णितं सूर्य स्वरूपं यथा– "षट् स्वरारूढेन वीजेन षडङ्गं रक्तम्बुजसंस्थितम् । सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वया भयवरदहस्तं कालचक्रप्रणेतारं श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः" इति ।

सूर्यस्य विषये आधुनिक वैज्ञानिकानां मतं यथा–सूर्ये अनन्ता ऊर्जाशक्तिरस्ति । तयैव स्थावरजंगमाः प्राणिनः पालिताः पोषिताश्च भवन्ति । सौरशक्त्या विद्युदुत्पाद्यते, यानं चाल्यते, पाककर्मादिकं च क्रियते । सप्ताश्व इति सप्तविधकिरणा गृह्यन्ते । सरति गच्छति आकाशे इति व्युत्पत्त्या सूर्य शब्दो निष्पद्यते । अयं ग्रहाणां राजेति कथ्यते । ग्रह दृष्टया सूर्यो रक्तवर्णः, गायत्र्या अधिकरणमपि सूर्य एव मन्यते । वैज्ञानिक मतानुसारेण सूर्यस्योर्जाशक्तिः प्रतिदिनं व्ययेन क्षीयमाणाऽस्ति । कालान्तरे साशक्तिः क्षीयते ततः संसारोऽन्धतमसाच्छन्नो भविष्यतीति ।

एष भगवान्सूर्यः स्थावरजंगम जीवानामात्माऽस्ति । "सूर्य आत्मा जगतस्तस्थुषश्च" सूर्योपनिषद् । "स एष आत्मा लोकानाम्" –श्रीमद्भगवतम् ५।२२।५। सूर्योपनिषदनुसारेण–सूर्यादेव इमानि भूतानि जायन्ते । सूर्य एव प्रत्यक्षं विष्णुः, स एव प्रत्यक्षं ब्रह्मा, प्रत्यक्षं रूद्रश्चास्ति । तस्मादेव देवा वेदाश्च जायन्ते । स एव मनोबुद्धि चित्ताहंकाररूपः । स एव शब्दस्पर्श रूप रस गन्धरूपः । सूर्यादेव इमानि भूतानि पालितानि सन्ति, सूर्ये लयं प्राप्नुवन्ति च । सूर्योपनिषदि सूर्यस्य ब्रह्मस्वरूपत्वं प्रतिपादितमस्ति– "असा वादित्यो ब्रह्म" इति । अतः सूर्य एवास्माकं वास्तविक ब्रह्मस्वरूपतया विद्यते, तदुक्तम् "यः सूर्यः सोऽहमेव च" इति । चक्षुरिन्द्रियाधिष्ठानतया स एवास्माकं चक्षुरिति कथ्यते– "चक्षुर्नो देवः सविता"– सूर्योपनिषत् । सूर्योपासनायामष्टाक्षरो मनुः प्रसिद्धोऽस्ति ।

☫ उपप्रध्यापकः विश्वविद्यालयविद्यापीठस्य वेलकुण्डी, दाङ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालदेशे भारतेचाऽनादिकालादेव सूर्यस्योपासना व्रतादिकं च प्रचलितमस्ति । वहवो नरानार्यश्चादित्यवासरे सूर्यव्रतं धारयन्ति । अस्मिन् व्रते मध्यान्हे सूर्यपूजाया विधानमस्ति । सूर्य भक्ता: प्रात: स्नात्वा मध्यान्हे सूर्यं प्रपूज्य, आदित्यहृदयादिस्तोत्रपाठं च कृत्वा लवणवर्जितं हविष्यान्नमेकवारं दिने भुञ्जते । प्रायो नरा नार्यश्च स्नानानन्तरं प्रत्यहं जलेन सूर्यायार्घ्यं ददति । आरोग्यावाप्तये , धनलाभाय, पराक्रमप्राप्तये, दीर्घायुष्ट्वाय, सन्तानार्थं च भगवान् सूर्यनारायण उपास्यते, अर्च्यते, वैदिकसूक्तपाठै : तवपाठादिभिश्च स्तूयते । किं वहुना, सर्वज्ञस्य सर्वशक्तिसम्पन्नस्य भक्ताभिलषितप्रदातु: कृपापारावारस्य भगवतो भास्करस्य प्रसाद सिद्धये दीर्घ तप: कठोरव्रतादिकं च कुर्वन्ति नरा : ।

कुष्ठरोगाभिभूतो मयूरकवि: स्वकृतसूर्यशतकेन भगवन्तमादित्यं स्तुत्वा तत्प्रसादेन नैरूज्यमाप । सत्राजिते नृपाय सूर्येण प्रदत्तस्य प्रत्यहमष्टभारमित सुवर्ण प्रदानसमर्थस्य स्यमन्तकमणे रूपाख्यानं भागवते विस्तृतमस्ति । द्रौपद्यै सूर्येणैका विलक्षण शक्तिसनाथा पाकस्थाली प्रत्ताऽऽसीत्, या द्रौपदी भोजनात् प्राक् यावन्तो जना भक्षयेयु स्तथापि न रिक्ततां गच्छतिस्म ।

भगवान् सूर्यनारायण: समये समये वेदराशिं पुराणादिकं शास्त्रं चाविष्करोति । याज्ञवल्क्यस्योपासनया प्रसन्न: सूर्यो वाजिरूपधर:सन् तस्मै अयात–यामं (नवीनं)वेदं प्रददौ, य: शुक्लयजुर्वेद इति प्रथितो ऽति । सूर्यप्रोक्तं सौरपुराणमस्ति यत्र शिवस्य महिमा सविस्तरं वर्णितोऽस्ति । भगवता सूर्येण ज्यौतिष शास्त्रमप्याविष्कृतम्, तत् सूर्यसिद्धान्त इति कथ्यते । अतएवाधुना लोके सिद्धान्त ज्यौतिषं प्रचलितमस्ति । भगवान् सूर्य: कालचक्रप्रणेता इत्यपि कथ्यते । सूर्यादेव दिन-मासर्तु-संवत्सर युगादि कालो विभाज्यते ।

ज्यौतिष शास्त्रानुसारेण ज्ञायते यत्- मेषादयो द्वादश राशयो भवन्ति । सूर्य एकमासपर्यन्तमेकराशौ तिष्ठति । वैशाखमासे सूर्यो मेषराशौ तिष्ठति । एवं चैत्रमासपर्यन्तं सूर्येण द्वादश राशय:पूर्यन्ते।स एवं सम्वंत्सरात्मक: कालो भवति। मकरादारभ्य मियुनराशिपर्यन्तं यदा सूर्य स्तिष्ठति स सूर्यस्योत्तरायणकाल:। कर्कटात् धनुष्पर्यन्तं सूर्यस्य दक्षिणायनकालो भवति । उत्तरायण काले व्रतवन्ध विवाहादय: संष्कारा:,लक्षहोम-कोटिहोम-सोमयाग-गायत्रीपुरश्चरणादयो महायागा:, महादानानि, शैव वैष्णव मूर्तिप्रतिष्ठादि शुभकार्याणि च क्रियन्ते । दक्षिणायने विशेषत: पितृकार्याणि क्रियन्ते।खगोलविदो वैज्ञानिका:सूर्यगोलकस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिमाणं पृथिवीतो दूरतामानं च वर्णयन्ति ।

भौमादयः सर्वे ग्रहाधिराजं भगवन्तं सूर्यमेवाश्रित्य नियमेन परिभ्राम्यन्ति । महादेवस्य सूर्यस्य महिमानं यथार्थते ज्ञातुं कः समर्थः ? त्रेतायां कपिराजःसुग्रीवो द्वापरे महारथी कर्णश्च भगवतःसूर्यस्यैवांशाज्जातौ। हनुमतो विद्यागुरूरपि सूर्य एवासीत् ।

अथ मार्कण्डेय पुराणानुसारेण किञ्चिदुच्यते । जगदिदं सृष्टेः प्राक् प्रभाहीन मन्धतमसाच्छन्नमासीत् । तदैकमत्युज्वलं हैममण्डं प्रादुरभूत् यज्जगतः परमकारणरूपमासीत् । तस्मिन् जगत्पिता ब्रह्माजज्ञे । ब्रह्मणा च तस्याण्डस्य भेदनं कृतम् । तदन्तरं ब्रह्मणो वदनात् ' ओ ३ म् इति महाञ्छब्द उदपद्यत । ततः: ' भूः ' भुवः स्वः , इति व्याहृतित्रयं जातम् । एता व्याहृतयः सूर्यनारायणस्य स्वरूप भूताः सन्ति । पुनश्च ' ओमि ' तिशब्दात्सूर्यस्य सूक्ष्मरूपमुत्पन्नम् । ततः स्थूलस्थूलतरादिक्रमेण महः, जनः , तपः, सत्य मित्येतानिरूपाणि प्रादुर्भूतानि । भूरादिसत्यान्ताः सप्त व्याहृतयः सूर्यदेवस्य मूर्तरूपाणि सन्ति । भगवतो भास्करस्य भूरादि व्याहृतिस्वरूपादेव ऋगादयश्चत्वारोवेदाः समजनिषत । ततः समस्तवैदिकतेजांसि ओंकाररूपे परमतेजसि मिलितानि । तत्फलेनैकं महत् तेजःपुञ्जं दृष्टिपथमायातम् । तदेव तेजःपुञ्जमादौ जातत्वादादित्यनामकंबभूव । इदमेव तेजः समस्तविश्वस्य कारणं सौरतत्त्वमस्ति । तदुक्तं सूर्यस्वरूप विषये मार्कण्डेयपुराणे–

तदेवं भगवान् भास्वान् वेदात्मा वेदसंस्थितः ।
वेदविद्यात्मकश्चैवपरः पुरुष उच्यते ॥

भगवान् भास्करो वेदरूपो वेदविद्यारूपश्चास्ति । अतः स परमपुरुष इत्युच्यते । सएव रजःसत्वतमोगुणानाश्रित्य विरिञ्चिनारायण शङ्करात्मरूपोजातः । अतः स एव सृष्टिस्थितिलयकर्तेत्युच्यते । तथाचोक्तं सूर्यमण्डलाष्टके स्तोत्रे-

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायण शंकरात्मने ॥

भगवतः सूर्यस्य ब्रह्मस्वरूपत्वं यथा–

देवैः सदेड्यः सतुवेदमूर्तिरमूर्तिराद्योऽखिलमर्त्यमूर्तिः ।
विश्वाश्रयं ज्योतिरवेद्य धर्मा वेदान्तगम्यः परमः परेभ्यः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्थः - ब्रह्मस्वरूपतया भगवान् भास्वान् देवैः सदास्तूयते , स वेदप्रदाता स वेदमूर्ति रित्यपि कथ्यते, वस्तुतः स मूर्तिरहितः । मूर्तिस्तु मायया कल्प्यते अतो मूर्तिरहित स्वरूपमेव नित्यं वर्तते । स एव मायमा विश्व मूर्तिरपि भवति स एव विश्वस्यश्रय:, अर्थात् विश्वं मायया तत्रकल्पितमस्ति ।स एव ब्रह्मज्योति रिति कथ्यते । अनन्ततया न तत्स्वरूपं यथार्थतो ज्ञातुं पार्यते । परात्परः परमपुरूषो भगवान् मरीचिमाली वेदान्तवेद्य इति कथ्यते । वेदान्त मनुशीलयद्भी रागद्वेष रहितैः शुद्धान्तःकरणैः सद्भिः स्वस्वरूपतया ज्ञातुं शक्यते इत्यर्थः ।

यदा सवितुः प्रचण्डं तेजोमण्डलं जगत् तप्तुं जलादिकं च शोषयितुमारभत तदा जगन्नाश भयाद् भीतो ब्रह्मा भगवन्तं सूर्यं परब्रह्मरूपेण स्तौतिस्म । तदुक्तं मार्कण्डेयपुराणे–

नमस्ते देवरूपाय यज्ञरूपायते नमः ।
परब्रह्मस्वरूपाय चिन्त्यमानाय योगिभिः ।। इति ।

एकदा देवदानवयुद्धे दानवेभ्यः स्वपुत्राणां देवानां पुनःपुनः पराजयं दृष्ट्वा दक्षपुत्र्या कश्यपपत्न्या अदित्याऽपि भगवतो भास्करस्य विविधरूपेण स्तुतिः कृता । तस्यां स्तुतौ कथितमस्ति–भगवान् सूर्यः परमसूक्ष्म–सुवर्णमय – शरीर धारक इति समस्ततेजसां केन्द्री भूतःपुरूष इति च कथितमस्ति । सौरतेजस एव सकलौषधीनां पाको भवति । सूर्य तापादेव कठिनो हिमराशिर्द्रवी भूय नदी रूपेण सस्यादिखाद्यपदार्थं मुत्पादयति । सूर्यदेव वसन्तसौन्दर्यं प्रादुर्भवति। सूर्य एव सकल प्राणिभ्यो जीवनामृतं वितरति।स एव देवान् पितॄंश्च तर्पयति। भगवान् सूर्य एवाग्निसोमात्मकरूपेण विरोधिनोस्तीव्रसौम्यरूपयोः समन्वया–धारः-इत्यादिरूपया स्तुत्या प्रसन्नो भास्करोऽदित्यै दर्शनं ददौ । अदितिः सर्वत्र प्रसृतमसह्यं तेजोमण्डलं वीक्ष्य तच्छान्तये पुनःस्तोतुमुपचक्रमे ।

हे भगवन्! गोपतेः अहमिदानीं भवतस्तेजोऽभिभूता सती भवन्तं द्रष्टुमसमर्थाऽस्मि । हे प्रभाकरः! प्रसन्नो भव,येन भवन्तं द्रष्टुं शक्नुयाम्,तादृशं रूपं कुरू । हेभक्तवत्सल ! मामनुगृह्य मत्पुत्राणां रक्षणंकुरू । त्वमेव विरिञ्चिरूपो विश्वं सृजसि, विष्णुरूपः पालयसि, स्वकीयेरूद्ररूपे विश्वमिदं विलापयसि । ब्रह्मविष्णुशिवादयः,सरित्समुद्रादयश्च सर्वे भवद्रूपाएव । योगिनश्च योगाभ्यासेन सततं भवन्तमेव ध्यायन्तः परमपदं प्राप्नुवन्ति । कर्मनिष्ठा ब्राह्मणाश्च भवन्तमेव यज्ञपुरूषं यजन्ति स्तुवन्ति च । अदितेः प्रार्थनया प्रसन्नो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूत्वा भगवान् भास्करः स्वकीयं सौम्यरूपं दर्शयतिस्म । ततोऽदितेः पुत्ररूपेण स्वयमाविर्भूय भगवता आदित्येन देवा रक्षिताः ।

सूर्यदेवस्य परिवार विषयेऽपि तत्र वर्णितमस्ति यथा–अदितितनयो मार्तण्डो विश्वकर्मणः पुत्रीं संज्ञां व्युवाह । तस्याः सकाशात् वैवस्वतमनोर्यमुनाया यमस्य च जनिरभूत् । एकदा सूर्यस्य प्रचण्डं तेजः सोढुमशक्नुवती संज्ञा स्वस्थाने छायां निवेश्य पतिदेवस्य सौम्यंरूपं द्रष्टुकामा वडवारूपधारिणी सती तपस्तप्तुमुत्तरकुरूदेशं गता ।

सूर्यश्छायामेव संज्ञां मत्वा तया सह यौवनविहारं करोतिस्म । सूर्यात् छायायाः सकाशात् द्वौ पुत्रौ सावर्णिर्नाम मनुःशनैश्चरो नाम ग्रहश्च जातौ । छायाया एका तपती नाम्नी पुत्री च प्रादुरभूत्, सा कुरूदेशनृपस्य संवरणस्य पत्नी जाता । ततः संज्ञाऽपत्येषु स्वापत्येषु च छायायाः स्नेह वैषम्यं जातम् । तद् दृष्ट्वा तत्कारणं कथयितुं साग्रहमाज्ञप्तायाश्छायायाः सकाशात्सूर्यस्तत्कारणं ज्ञातवान् यत्– संज्ञा स्वतेजः सोढुमशक्नुवतीसती वडवारूपं धृत्वा तपसे गतेति । ततः सूर्येण स्वतेजः शान्तये विश्वकर्मा उक्तः । विश्वकर्मणा देवैश्च 'भवानेव स्वतेजः शान्तं करोतु' इत्युक्तः सूर्यः स्वयमेव स्वतेजः सौम्यं चकार । कुत्रचित् विश्वकर्मणा भ्रमियन्त्रमारोप्य सूर्यस्य प्रचण्डं तेजः प्रशमित मित्यपि प्राप्यते ।

तत सूर्योऽश्वरूपं धृत्वा संज्ञासमीपं गतवान् । संज्ञा च तं परपुरूषं मत्वा स्वपातिव्रत्यं पालयितुं यतितवती । किन्तु अश्वाया अश्वस्य च नासिकास्पर्शो जातः । ततोऽश्विनीकुमारौ देव भिषजौ जातौ । तयोस्तेजोवीर्यपतनेन रेवन्तनामा पुत्रश्च जातः । तत स्तमश्वं स्वपतिं सूर्यदेवं ज्ञात्वा संज्ञा कृत्रिमरूपं त्यक्त्वा स्वंरूपं धृतवती । अश्वरूप सूर्यश्च स्वकीयं सौम्यरूपं दधौ । इत्थं पुन र्यथार्थदम्पत्योर्मेलनं जातम् ।

संज्ञासूर्ययो ज्येष्ठपुत्रो वैवस्वतोऽनेकविद्यापारंगतो महाप्रतापी मनुपदवीमाप्तवान् । इदानीं तस्यैव मन्वन्तरं प्रचलति । राज्ञो राज्यवर्धनस्य प्रजाभिः सूर्यमाराध्य राज्ञो दशसहस्रवर्षपर्यन्तं दीर्घमायुः प्रापितम् । राज्ञाऽपि पुनः सूर्यमाराध्य प्रजानामपि तादृशमेवायुर्दापित मित्यादिका कथा पुराणेषु प्राप्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आयुर्वृद्धये सूर्योपासना

भगवतः श्रीसूर्यनारायणस्याराधनया आयुर्वृद्धिः कर्तु शक्यते, यतः प्राणवायोः शरीरान्तः सञ्चरणमेवायुः कथ्यते । "अन्नं वै प्राणाः" इति श्रुत्यनुसारेणायुरन्नाधीनम् , अन्नं वृष्टेरधीनम्, वर्षणं सूर्याधीनम् । अतः शास्त्रोक्त विधिना कृतया सूर्योपासनया बलवीर्याधानपूर्वकं समयानुकूला सुवृष्टि प्राप्यते । तया निर्दोषं पोषकं बलप्रदं सदन्नं लभ्यते । तस्य सदुपयोगेन शरीरं तदन्तःसञ्चारिणः प्राणांश्च सबलीकृत्येच्छानुरूपमायुर्वृद्धिः कर्तु शक्यते । अतो दीर्घायुष्यलाभाय सूर्य उपास्यते ।

सूर्यार्घ्यम्

सूर्याय प्रतिदिनमर्घ्यदानं सूर्यप्रसादस्य सरल उपायोऽस्ति । दिव्यतेज एवं सूर्यस्य शरीरम् । जलेन तेजस उद्दीप्तिर्भवति । मनुष्यैरर्पितमर्घ्यजलं किरणमार्गेण सूर्यशरीरं प्रविश्य तदाप्याययति, उद्दीपयति च । यद्यपि सूर्यस्य सहस्रं किरणा एव पृथिवीतो जलमाकृष्य स्वकलेवरं स्नेहसिक्तं कुर्वन्ति, तथापि अर्घ्यजलेऽपूर्वं विशेषतया सहा साधारणशक्ति भवति, यद्यप्यर्घ्यजलं स्वल्पं भवति तथापि तत्र गुणबाहुल्यं वर्तते । प्रतिदिनं स्नानानन्तरं प्रदत्तमर्घ्यजलं मानेनाल्पमपि सारवद्भवति । अस्माभिरर्पितेनार्घ्यजलेनाप्यायिताः सूर्यकिरणा अस्माकं शरीरं प्रविश्य शरीरस्याप्यायन मुद्दीपनं च कुर्वन्ति । अतएवास्माकं संस्कृतावर्घ्यदानं नित्यकर्मत्वेन प्रचलितमस्ति । नित्यार्घ्यदानेन पोषिताः सवर्धिताश्च सूर्यकिरणाः खाद्यपेयपदार्थेषु पुष्टं रसमादधति । तेन रसेन मानवानां स्वास्थ्यस्य नैरूज्यस्य दीर्घायुष्ट्वस्य च लाभो भवति ।

सूर्यस्य त्रीणि रूपाणि

आधिभौतिक–आधिदैविक– आध्यात्मिक भेदेन सूर्यस्य त्रीणिरूपाणि सन्ति । आकाशे तेजोमयं यद् भौतिकं पिण्डं दृश्यते तत् सूर्यस्याधिभौतिक स्वरूपम् । भक्तजना यं सूर्यमुपासते , स्तोत्रादिभिः स्तुवन्ति , आरोग्यलाभाय प्रार्थयन्ति । भक्ताभीष्टसाधकोयः प्रसन्नः सन् भक्ताय वरं ददाति । यो ऽदिते पुत्ररूपेणाविर्भूयदैत्यान्समहरत् , येन विश्वकर्मणः पुत्रीं संज्ञां परिणीय वैवस्वतादयः सुताः समुत्पादिताः , तदाधिदैविकरूपं (देवतारूपं) सूर्यस्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

य उपनिषद्भिः पुराणादिभिश्च शास्त्रैस्तत्त्वतः प्रतिपाद्यते, य स्त्रिगुणात्मकप्रकृतेरधिश्वरः यः सकलप्रपञ्चस्याधिष्ठानम्, तत् परात्परं सच्चिदानन्दरूपं विशुद्धचैतन्यस्वरूपं ब्रह्मैवाध्यात्मिकरूपं सूर्यस्य।

ननु एकस्यैव सूर्यस्य परस्परविरुद्धं रूपत्रयं कथं संगच्छते इति-चेच्छ्रूयताम्, अविचारदृष्ट्या एकस्य रूपत्रये विरोध इव दृश्यते किन्तु सूक्ष्मविचारमवलम्ब्य समीक्षणे कृते विरोधपरिहारो भवति। यथा एकं नागरङ्गफलमस्ति। तस्यापि रूपत्रयं दृश्यते, वहिः पीतं वल्कलं दृश्यते, तदन्ता रसधारकाअवयवाः सन्ति, तदन्तरेको रसरूपः सार भूतः पदार्थोऽस्ति। नागरङ्गस्य वास्तविकस्वरूपं रस एव। किन्तु यदिरसधारका अवयवा नस्युस्तदा रसः कुत्रवसेत्? अतः सोऽवयवोऽपिनाग-रङ्गस्य स्वरूपमेव। पुनश्च यदिवहिर्वल्कलेन नाच्छाद्येत तदाऽन्ता रसपरि-पुष्टिं नसंभवेत्। अतस्तस्मिन्फले त्रयाणामेव रूपाणामावश्यकता वर्तते। अस्माकं शरीरेऽपि वहिर्भौतिकरूपं मांसपिण्डमस्ति, तदन्तः प्राणमनोबुद्ध्यादि विशिष्टं चैतन्यमाधिदैविकरूपं विद्यते, तदन्तः सारभूतः सर्वत्रव्यापकश्चिद्रूप आत्मा आध्यात्मिकरूपेण विभाति। इत्थमस्मदादी-नामपि रूपत्रयं दृश्यते चेत् परात्परस्य देवाधिदेवस्य मायापतेरनन्तशक्ति-सम्पन्नस्य भगवतो भास्करस्य रूपत्रय विषये किमु वक्तव्यम्।

आधिभौतिकस्वरूपम्

ये स्थूलदृष्टया विचारयन्ति ते प्रत्येकवस्तूनामन्तः स्थितं चैतन्यतत्त्वं द्रष्टुं न शक्नुवन्ति,ते केवलं वाह्यस्थूलवस्तु एव पश्यन्ति। तेषां कृते सूर्योनामैकं गोलाकारं तेजःपिण्डमेव। आधुनिकवैज्ञानिकाश्चस्थूल दृष्टिमवलम्ब्य कथयन्ति-यत् सूर्यानाम तेजोमय भौतिक पिण्डमेवेति।भौतिक सूर्येऽपि नानाविधाः शक्तयः सन्ति।सौरशक्त्यैव धान्यादीनां पाकःसम्पद्यते। सूर्ये भौतिकशक्तिरप्युत्कटावर्तते। यन्त्रद्वारा सौरशक्तिमेकत्रीकृत्य दैनिक पाकादिकार्यंच सम्पाद्यते। सौर्य-शक्तिप्रयोगेण समुद्रगामिनो महान्तः पोता अपि प्रवाहयन्ते। अधुना सौर्यशक्त्या विद्युदप्युत्पाद्यते प्राचीनकालेऽपि सूर्यतेजः शमयितुं भ्रमियन्त्रमारोप्यसौर्यपिण्डस्य शातनसमये निःसृतैरग्निकणै र्विश्वकर्मणा प्रभूतशक्तिसम्पन्नानि बहून्यस्त्राणि निर्मितान्या सन्निति पुराणे-श्रूयते। अधुनाऽपि चिकित्सकैर्दुःसाध्येष्वर्बुदादिरोगेषु यन्त्रद्वारा सूर्यकिरणप्रयोगेण चिकित्सा क्रियते। रात्रावन्धकारेणखिलीकृतो लोकःसूर्योद-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

येसन्ति स्वस्वकार्ये प्रवर्तते। सूर्यकिरणतापेन शीतबाधानिवारणं तु आर्कटपतङ्गं प्रसिद्धमेव । शीतकाले सूर्यस्यतापः कियान् प्रियङ्कर इति च सर्वेषामवगतमेव । सूर्यस्य किरणे रक्तपीतादयःसप्त वर्णाः सन्ति, तान् वर्णान् जले सञ्चार्य तज्जलं विविधरोगप्रशमनाय प्रयुज्यते–इत्यादिकाः सूर्यकृतलाभा अवर्णनीयाः सन्तिः ।

आधिदैविक स्वरूपम्

आधिदैविक दृष्टिसम्पन्ना जना आधिभौतिकदृष्टचपेक्षया अन्तः प्रविश्य सूक्ष्मरूपेण विचारयन्ति । जडवस्तुनोऽन्त रधिदैवरूपं विद्यते । अस्य भौतिक संघातस्य कोऽप्या धारोऽवश्यं भवेत् । यद्यधिष्ठान तत्त्व न भवेत् तदा भौतिकरूपं कथं सत्ता माप्नुयात् । शून्येतु न किमपि कल्पयितुं निर्मातुं वा पार्यते । अतो भौतिक वस्तुकल्पना धिष्ठानमवश्यं भवेत् । तदेव (अधिष्ठानतत्त्वमेव) सूर्यस्याधिदैविक भावः । अस्थिरस्य भौतिकतत्त्वस्य व्यवस्थापकमेकं स्थिरं तत्त्वं स्वीकार्यमेव । तच्च चैतन्यमेव । तदेव भौतिकसौरपिण्डस्य व्यवस्थापक माधिदैविक स्वरूपम् । यद्यधिष्ठान मप्यचेतनमेव कल्प्येत तदा जडस्य भौतिक संघातस्य निष्पादकः को भवेत् ?

आकाशमण्डले दृश्यमानस्य तेजोमयगोलकस्यान्तः प्रविश्य सञ्चालक श्चेतनो भगवान् सूर्यनारायणो देवतारूपोऽभ्युपगन्तव्यः । स एव चर्कर्ति वर्भर्ति जर्हर्तिच जगत् । स एव भक्तजनैः स्तूयते, ध्यायते, पूज्यते, नमस्क्रियते च । स एव भक्तानां वरदायकः । स एवादितेर्गर्भाज्जातो दैत्याञ्जघान । स एव वैवस्वतमनोः पिता ।

अस्माकं देशे यन्मूर्तिपूजायाः प्रचलन मस्तितत्रन केवलस्य जडस्य प्रस्तरादेः पूजा भवति । किन्त्वाधिदैविकदृष्टिमवलम्ब्य तास्ता जडा मूर्तयः पूज्यन्ते । सूर्य-चन्द्र-ग्रह-नक्षत्र-तारा-पृथिवी-वायु-गन्धर्व-मनुष्य-नद-नदी-समुद्र-पर्वतादीनांपूजा तत्तदाधिदैविक दृष्टयैव क्रियते । हिमालय पर्वतस्ययदि भौतिकरूपमात्रं भवे त्तर्हि तत्पुत्रीं पार्वतीं परमेश्वरः कथं विवहेत् ? अतो हिमालयपर्वतस्याधिदेवरूपो हिमालयोऽस्ति चेतनः । तस्य पत्नी मेनकाऽऽसीत्। तयो पुत्री पार्वती गिरिशेन परिणीतेति कथनं सगच्छते ।

आध्यात्मिकस्वरूपम्

तृतीय दृष्टिराध्यात्मिकी । एषादृष्टि राधिदैविकदृष्टेरप्यतिषयसूक्ष्मा ऽस्ति । प्रति भौतिकपिण्डे प्रविष्टा ये सूक्ष्मा देवाः सन्ति । तेषां सर्वेषां केन्द्रीभूतं तत्त्वमेकं महाचैतन्यमस्ति । तदेवाखण्डं विशुद्धं चैतन्यतत्त्वं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परब्रह्मे ति परमात्मेतिच कथ्यते । एकस्मिन्मूलचैतन्ये एवैतद् विविधं विश्वं ग्रथितंमस्ति । सकलो हि प्रपञ्चः सच्चिदानन्दरूपस्य मूलब्रह्मण आभासः प्रतिविम्बो वा अंशोवेति निगद्यते । आकशवर्तिनः प्रचण्डप्रकाशपिण्डस्य तदन्तर्वर्तिचेतनात्मकदेवस्य च सत्ताप्रदाता परमसत्यः परमेश्वर एव वेदान्तैः सूक्ष्मदृष्टया प्रतिपाद्यते । तदेव विशुद्धं ब्रह्म कथ्यते । तदेव सूर्यतत्त्वमिति सर्वेषां शास्त्राणामाशयः प्रतिभाति ।

अधुना वैवस्वतस्य सप्तममनोरष्टाविंशतितमं कलियुगं प्रवर्तमानमस्ति । इदं सप्तमं मन्वन्तरं पराक्रमाशालिना सूर्यपुत्रेण वैवस्वतेन प्रचाल्यमानमस्ति । अतोऽस्मिन् युगे सर्वो हि मानवसमाजः सूर्य देवस्यैव सन्तति रस्तीति कथने नात्युक्तिर्भवेत् । सूर्येणसहास्माकमति निकटस्थः संबन्धो वर्तते । अतः परमपितुः सूर्यस्य स्तवनं, ध्यानं, पूजनं, व्रतादिग्रहणमर्घ्यदानञ्चेत्यादि कार्यसम्पादनेन मानवजीवनस्योज्वलीकरणमस्माकं कर्तव्यमेव ।

अथ च जन्ममरणादिदुःखपरम्परासम्पादकस्य संसारस्य निवृत्तिपूर्वकं परमानन्दरूप मोक्षलाभाय च प्रयत्नः कर्तव्यः । भगवान् सूर्यनारायण एव वेदप्रतिपाद्यः परमात्मा । स एव तत्त्वमस्यादि महावाक्यै जीवस्य वास्तव स्वरूपमिति कथ्यते । अत एव "सूर्य आत्मा जगत तस्थुषश्चे" ति विभ्राट्-सूक्ते कथितमपि संगच्छते ।यावत् स्व स्वरूपं सम्यक् न ज्ञायते तावत् दुःखमयः संसारप्रवाहो न निवर्तते । ब्रह्मैवास्माकं निजस्वरूपम् । सूक्ष्मदृष्टया विचार्यमाणे सूर्यो नाम ब्रह्मैवेति निश्चीयते । ब्रह्मैवैतज्जगत् सृष्ट्वा तत्र स्वयमेव जीवरूपेण प्रविष्टमस्ति । "तत् सृष्ट्वा तदेवानु प्राविशत्" । अतो जीवो ब्रह्मैवेति वेदान्तराद्धान्तः । "ज्ञाते तत्त्वे कः संसारः" तत्त्वज्ञानेनाज्ञानं निवर्तते, ततोऽज्ञानकार्यं संसारोऽपि निवर्तत एव । अतः परमार्थदृष्टिमबलम्ब्य परमात्मा सूर्यनारायणो ऽस्माकं वास्तव स्वरूपमेवेति सूर्यतत्त्वस्य तत्त्वतो ज्ञानेन दुःखस्यात्यन्तिक निवृत्तिपूर्वकं परमानन्दलाभोऽप्यस्माकं परमकर्तव्य एव ।

०–०–०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आन्वीक्षिकी धर्मनिर्णय प्रयोजिका

दीर्घराज घिमिरे [1]

सन्ति हि लोकेषु विभिन्नाः परम्पराः, ता आश्रित्यैव लौकिकाः शास्त्रीयाश्च व्यवहारा यत्र तत्र दृश्यन्ते श्रूयन्ते च, तासु काश्चित् सर्वथैव शास्त्रानपेक्षाः, काश्चिच्छास्त्र व्यवहारोभयानुगताः, काश्चित्तु शास्त्रानुसारि-निर्णयैरेव ज्ञातव्याः कर्तव्याश्च, एतासु प्रथमाशयन गमनादिका रागतः सिद्धाः, द्वितीया स्नान भोजनादिकाः, मलापकर्षणार्थं क्षुन्निवृत्त्यर्थञ्च स्नान भोजने विधेय इति रागतः,– 'स्नात्वा सन्ध्यामुपासीत' इति 'श्रुतिभिर्द्विरशनं प्रोक्तं प्रातः सायञ्चे - ति च शास्त्रत इत्युभयानुगता, तृतीया तु शास्त्रानुसारि निर्णयैरेव कर्तव्या इति शास्त्रार्थ निर्णयमन्तरा सर्वथैव कर्तुमनर्हा 'सन्ततिः शुद्धवंश्याहि परत्रेह्यशर्मणे' इत्याद्युक्त्या सवर्णा स्त्री विधिना परिणेयेति प्राप्यते, अन्यथा परत्रेहच शर्म न भवतीति स्व सन्ततेः शुद्धत्वरक्षायै असवर्णा स्त्री न परिणेया, सवर्णातिरिक्तायां परिणीतायामपिस्त्रियां तज्जन्यायाः सन्ततेः शुद्धत्वाभाव इति शास्त्रैकगम्या विषया न केनचिन्निप्रणेनापि शास्त्र मन्तरा निर्णेतुमशक्या इति तथा विधानां शुद्धत्वा शुद्धत्वयोर्निर्धारणं सर्वथैव शास्त्राधीनमिति प्राप्तम्, शास्त्रञ्चवहुविधमतोऽर्थ निर्णयप्रयोजकं कतमच्छास्त्रमिति भवति विभ्रमः केषाञ्चित्, तादृश भ्रम निवारकञ्च शास्त्रं धर्मशास्त्र मिति व्यपदिशन्ति सन्तः, धर्मस्य न प्रत्यक्षानुमान विषयता अदृष्टत्वेनायोग्यत्वात् अदृष्टे तु स्वर्गापवर्ग मात्रे नैसर्गिक मोहान्धतमस विलुप्तालोकस्य लोकस्य शास्त्रमेव प्रकाशः, तदेव सकल सदुपाय दर्शनेदिव्यं चक्षुरष्मदादेर्न योगिनामिव योगसमाधिजज्ञानाद्युपायान्तरमपिति तस्मादस्मदादेः शास्त्रमेवाधिगन्तव्यम्'इति जयन्त भट्टोक्त्यापि शास्त्रैक समधिगम्यत्वं धर्मस्यसमर्थितम्। स च परम गुह्यः सूक्ष्म तमश्च अतः पृथग् जन समागमे तदुपदेशो व्यर्थः ' अद्य प्रभृति गाङ्गेयः परं गुह्यं प्रवक्ष्यति । अतो नेच्छामि कौन्तेय

[1] उप-प्राध्यापकः वाल्मिकीविद्यापीठस्थः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथग् जन ससागम, मिति युधिष्ठिरोक्त योग्येष्वेव शास्त्रोपदेशो युक्त अयोग्येषु ग्रहण धारणयो दुष्करत्वेनो पदेशो ऽनतिप्रयोजनक इतिसिध्यति, सिद्धे च धर्मनिर्णयस्य शास्त्राधीनत्वे तादृशं हि शास्त्रं धर्मशास्त्रमिति ज्ञानमेव धर्मज्ञानाधीनम्, वाक्यार्थं ज्ञानं प्रति वाक्य घटक यावत् पदार्थज्ञानस्यापरिहार्यत्वात्, नहि सिध्यति तादृशं ज्ञानं शास्त्रादृते लक्षण प्रमाणाभ्यां वस्तु सिद्धिरिति न्यायात्, धर्मस्य वस्तुत्वात् तत् सिद्धिरावश्यकी, तस्मादेव तन्निरूपक शास्त्रस्य धर्मशास्त्रत्व व्यपदेशः, अन्यथा ऽ वस्तु निरूपणा तस्य हितानुशासनरूपस्यशास्त्रत्वस्य हानिः स्यादेव ' प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्र मभिधियते, इति श्रवणात्, तथाच धर्मस्य शास्त्रं धर्मशास्त्र मिति षष्ठी समासेन धर्म शास्त्र मित्यायति, अत्र षष्ठी सम्बन्धार्था, स च प्रतिपाद्य–प्रतिपादकभावः, प्रतिपाद्यो धर्मः प्रतिपादकञ्च शास्त्रमिति तयोस्तथा विधः सम्बन्धः, शास्त्रस्य प्रतिपादकत्वञ्च ज्ञान द्वारा ऽतो धर्मशास्त्रयोः सम्बन्धो विषय विषयिभावोऽपीति शास्त्रं ज्ञानपरम्। एवञ्च शास्त्र विषयी भूतस्य धर्मस्य स्वरूप जिज्ञासा स्वाभाविकीति संक्षेपतस्तन्निरूपणायप्रयत्नः क्रियते।

अथ धर्मः स्थूल हेतुभूतेन केनचित्प्रवृत्तिनिमित्ते ननिरूपयितुमशक्यः पामराणां तत्र प्रवृत्य संभवान्, अपि तु व्युत्पत्तिलभ्यार्थे नैव व्युत्पत्तिश्चानेकधा भवति यथा – धृञ–धारणे–इति धातो रौणादि केन मन् प्रत्ययेन निष्पन्नो धर्म शब्दो विशेष्ये विशेषणे चोभयत्रैव गतार्थतां याति, धरति विश्वं लोकान् वेति व्युत्पत्या निष्पन्नो धर्म शब्दो जगत्कारणीभूत ब्रह्म वाचकः युक्तश्चैतत् 'भगवान् वासुदेवश्च कीर्त्यते ऽत्र सनातनः। शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्। सनातनंनाम अखण्ड दण्डायमानं नित्यत्वापर पर्यायम्। सनातनत्व विशिष्ट धर्मस्य ब्रह्मपरता -उक्तयुक्तया सिद्धैव, तादृशब्रह्मणोनिखिल ब्रह्माण्डा धिष्ठानतया धर्मत्वं तदाधारत्वञ्च कैमुतिकन्यायसिद्धमिति विशेष्यत्वं निरावाधमेव। ध्रियते वा जनै रिति द्वितीयव्युत्पत्या 'अर्तिस्तुसु' इत्यादिना धृञ औणादिके मन् प्रत्ययेऽपि धर्म शब्दोनिष्पद्यत एव। 'धर्म जिज्ञास मानानाम्' 'धर्मेण पापमपनुदति' 'अथातो धर्मजिज्ञासा' 'धर्मो रक्षति रक्षितः' 'धर्मक्षेत्रे' 'धर्मःप्रोज्झितः' 'धनञ्च धर्मैक फलम्' इत्याद्यनेक श्रुतिस्मृतीतिहास-पुराणेषु पुरुष प्रयत्नसाध्य क्रियाविशेष रूपेण धर्मस्य प्रतिपादना-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्तादृशक्रियायाश्चकर्तारं विनानुपपन्नत्वात्कर्तृ विशेषणतयैव भासमान कश्चित्-पदार्थो धर्म इति प्रतीयते । उभयविध व्युत्पत्त्यनुसारेण धर्मस्य विशेष्यत्वं विशेषणत्वञ्च युक्तमिति कतरं पक्षमङ्गीकृत्य धर्मशास्त्रत्व व्यपदेशःसतामितिप्रसङ्गः समायातः ।

ममत्वित्थं प्रतिभाति धर्मस्य पुरुष तन्त्रत्वे विशेषणत्वं वस्तु तन्त्रत्वे च विशेष्यत्वमिति विवक्षाभेद निबन्धनं धर्म धर्मिभाव प्रदर्शनेन निरूपणं शास्त्रेषु, विशेषणपक्षो लोक दृष्टिमनुरूध्य यथा 'विद्वद्भिः सेवितः सद्भिर्नित्य मद्वेषरागिभिः । हृदयेनाभ्यनुज्ञातो यो धर्म स्तं निबोधत' इति धर्मोपदेशं प्रतिज्ञाय 'वेदोऽखिलो धर्म मूलं स्मृतिशीले च तद्विदाम् । आचारश्चैवसाधूनामात्मन तुष्टि रेव च' इत्याद्युपक्रम्य'वेदः स्मृतिःसदाचारःस्वस्य च प्रियमात्मनः एतच्चतुर्विधं प्राहुःसाक्षाद्धर्मस्य लक्षणमि'तिनिगमितम्, अन्यत्रापि धर्मस्य कारकं ज्ञापक हेतूनभिदधता–'देशे काले उपायेन द्रव्यं श्रद्धा समन्वितम् । प्राप्ते प्रदीयते यत्तत्सकलं धर्मलक्षणम्' इत्यनेन कारकहेतूनभिधाय । ज्ञापक हेतून् प्रदर्श्योपसंहृतत्तम्'श्रुतिःस्मृतिःसदाचारः स्वस्य च प्रियमात्मनः।सम्यक् सङ्कल्पजः कामो धर्ममूलमिदंस्मृतम्'इत्यादिना,अत पुरुष व्यापारे तत्त्रत्वे न तत्र तत्र निर्दिष्टो धर्मः प्रकारीभूय भासत इति प्रतियते,तथाविधोहि धर्मो न सहसा सर्व बुद्धिगम्यो 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि' रिति श्रौतवचनेन 'प्रत्यक्षं चानुमानञ्च शास्त्रञ्च विविधागमम् । त्रयं सुविदितं कार्यं धर्म शुद्धिमभीप्सता' इति स्मार्त वचनेन च तस्य सौक्ष्म्यं निर्धार्य तद् ग्राहक प्रमाणैरपि तथैव भवितव्यमिति निश्चाययति, प्रमाण' संख्यानां धर्मादीनां सूक्ष्मत्वं न चर्म चक्षु गम्यमपि त्वान्वीक्षिकी च तर्क प्रधाना, तर्कश्च युक्तिरूपः, युक्तिर्हि मूर्खेषु शोभते न पण्डितेषु, अत एव 'अहमासं पण्डितको हेतुको वेदनिन्दकः । आन्वीक्षिकीं तर्कविद्या मनुरक्तो निरर्थिकाम्' इत्यादिना केवल तर्कविष्टम्भेनार्थसाधन प्रयासो निरर्थकता विपरीतार्थकतां वा आपद्यत इत्यनुभव पथमधिरोहति । अत उपर्युक्त तर्कावतारेणैवार्थसिद्धिः पण्डितैः रप्यवश्यं स्वीकरणीया भवति उपयुक्तत्वञ्चात्र वेदाविरोधित्वमेव तच्च प्रतिष्ठितत्वे पर्यवस्यति एवं ह्युदाहरणम् – शङ्खः शुचि विहितत्वा दित्यनुमानेन शङ्खस्य शुचित्वमनुमीयते विहितत्वस्य सद्धेत्वञ्च व्याप्ती पक्षधर्मता बलोत्सिद्धम् अतएव शङ्ख अशुचिः प्राण्यङ्गत्वात् नर शिरः कपाल वदित्यनुमानेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न प्रतिरोधः, निषिद्धत्वस्योपाधित्वात् उपाधिर्हि साध्यव्यापकत्वे सति साधना व्यापकत्वम्, यत्र यत्राशुचित्वं तत्र तत्र निषिद्धत्वमिति ग्राम कुक्कुट भक्षणादौ साध्यव्यापकम्, यत्र यत्र प्राण्यङ्गत्वं तत्र तत्र तत्र निषिद्धत्वाभाव इति पक्षीभूते शङ्ख एव साधनाव्यापकमतः शङ्ख शुचित्वसाधकमनुमान "मस्थिभिः शङ्खचूडस्य शङ्खजाति र्बभूवह । नाना प्रकार रूपेण शश्वत्पूता सुरार्च्चने" इति शास्त्र प्रामाण्यादनुकूलतर्कयुक्तमिति प्रबलम्, अशुचित्वं साधकमनुमानं तदपेक्षया दुर्वलमुक्त प्रमाणादेव, दृष्टान्तासिद्धेश्च, दृष्टान्तश्चात्र नर शिरः कपालम् तस्य 'नारं स्पृष्ट्वा च सस्नेहं सवासा जलमाविशेदि' त्यादिनाऽशुचित्व विधानात्, एवञ्चास्यानुमानस्यविपर्ययार्थे पर्यवसायित्वादनुकूल तर्क शून्यत्वमिति प्रबलत्व दुर्बलत्वयोः प्रयोजकस्तर्कः शरणी करणीयः सच आन्वीक्षिक्यनुकूलो मीमांसा परिशोधितश्चापेक्षणीय अतः सत्तर्कस्योपयोगिता स्वीकृता विद्वद्भि शास्त्रार्थ निर्णय— उक्तं हि— मोहंरुणद्धि विमलीकुरुते च बुद्धिं सूतेच संस्कृत पद व्यवहार शक्तिम् शास्त्रान्तराभ्यसन योग्यतया युनक्ति तर्क श्रमो न कुरुते कमिहोपकारम् इति । इत्थञ्च तर्काणां युक्तायुक्तत्व परीक्षणायैवान्वीक्षिकी अपेक्षणीया, प्रत्यक्षागमाभ्यामीक्षा तामनु प्रवृत्ता-ईक्षा अन्वीक्षा अनुमानं तत्प्रधानां तर्कविद्यामान्वीक्षिकीमित्यर्थः । केवलं शास्त्रमाश्रित्य न कर्तव्यो विनिर्णयः । युक्ति हीन विचारे तु धर्महानि प्रजायते' इत्युक्त्या शास्त्रानुसारिणी युक्तिः संक्रामणीया भवति, तर्कस्याप्रमाणत्वेऽपि प्रमाणोपकारकत्वं तर्काप्रतिष्ठित त्व साधकत्वञ्चास्तीतिसाधु प्रपञ्चितं बादरायणीये तर्काप्रतिष्ठानादिति सूत्रे तदीये शाङ्करभाष्ये तर्क ग्रन्थेषुचेति विस्तर भिया नेह तन्यते । कारणाद्धर्ममन्विच्छेन्न लोक चरितं चरेदि' त्युक्तिः स्वतो लोकाचारस्य धर्मनिर्णायकतांप्रतिषेधति , मीमांसापरिशोधिततर्कस्यधर्म निर्णायकत्वमाकलय्यनिर्णय सिन्ध्वादि निबन्ध ग्रन्थानां प्रणयनम् , तेषाञ्च सङ्ग्रह रूपतया परस्पर बाध्य बाधक भाव प्रदर्शनेन कार्यकारणभाव निरूपणेन च धर्मनिर्णयोपयोगित्वमिति नाविदितं विदुषाम् । न धर्मः परिपाठेनशक्यो भारत वेदितु मिति दिशा शास्त्रार्थ निर्णयाय युक्तिरेव समर्थिता 'नश्यति प्रज्ञा विद्यैवाभ्यास वर्जिते तिवत् सत्तर्क वर्जितो निर्णयो याथार्थ्यं न भजते सर्वथैवे- त्यपि कण्ठत एवोक्तम् , एवं हि धर्मस्य विशेषणता न किञ्चिदनुपपन्ना ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषणानाञ्च विशेष्य पर्यवसायित्वात्केनाऽपि विशेष्येणभाव्यमिति सार्वत्रिकी प्रसिद्धिरतो विशेष्यं किमिति जिज्ञासा स्वाभाविकी, तत्रोत्त-रमिदम् –

धर्मोऽस्त्री पुण्यआचारे स्वभावोपमयोः क्रतौ ।
अहिंसोपनिसन्त्याये ना धातुर्यम सोमयो '

दिति कोषादुपनिषदपि धर्म शव्दार्थः उपनिषच्च ब्रह्म विद्यैव, तस्याश्च प्रयोजनमशेष संसारोच्छेदः, निपूर्वकस्य सदेस्तदर्थत्वात्, आयुर्घृतमितिवत् साधने साध्योपचारादतो धर्म शब्देन ब्रह्मैव परिशिष्यते, एवमाचार स्वभावयोर्विशेष्य परता संभवति, युक्तयुक्तेति सुधिभि र्विभावनीया, एवञ्च तस्य धर्मिपरतायां काऽनुपपत्तिः? प्रत्युत सन्त्यागम वचनानि– धर्म धर्म्युभय परता साधकानि यथा काठके–'पुरुषान्नपरं किञ्चित्सा काष्ठा सा परागति' रिति भारते'त्रैलोक्य प्रकृतिर्देही तमसोऽन्ते महेश्वर' इति, मात्स्ये च 'धर्मेति धारणे धातुर्महत्वे वै प्रपद्यते धारणेन महत्वेन धर्म एव निरुच्यते' इत्यादयः, मनुस्मृतावपि धर्मजिज्ञासाया उत्तर प्रस्तावे 'आसीदिदं तमो भूतमप्रज्ञात-मलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत' इत्यनेन माया शवलितं ब्रह्मैव परमार्थतो धर्म इत्युपक्रम्यान्त उपसंहारोविहितो 'यस्तर्केणानु स न्धत्ते स धर्मं वेद' इत्यनेनेतिसार्वजनीनम् ।

एतावताच व्याकरण-कोष-श्रुति-स्मृतीतिहास-पुराणै धर्मस्य धर्म-धर्मि भावत्वं विवक्षाधीनमिति व्युत्पाद्य तस्य निर्णयिको विद्वानेवापेक्षित इत्युद् घोषितं शतशः शास्त्रेषु यथा–

'यो हि वेदेच शास्त्रे च ग्रन्थ धारण तत्परः
नच ग्रन्थार्थ तत्त्वज्ञस्तस्य तद्धारणं वृथा ।
भारं स वहते तस्य ग्रन्थस्यार्थं न बेत्ति यः
यस्तु ग्रन्थार्थ तत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥ इति

श्रुतौच 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं नविज्ञानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ' इति । अभिप्रेत्यैवेदं मनुस्मृतौ 'परिषद् स्यादृशावरा' इत्यभिधाय 'एकोऽपि वेद विद्धर्मं यं व्यवस्येद्द्विजोत्तमः । सविज्ञेयः परो धर्मो नाज्ञाना मुदितोऽयुतै ' रित्युक्तम्, याज्ञवल्क्येनापि ' चत्वारो वेद धर्मज्ञाः पर्षत्त्रैविद्यमेव वा । साब्रूतेयं स धर्मः स्यादेको वाऽऽध्यात्मवित्तम्' इत्येतत्सर्वमभिप्रेत्यैव मनुर्विधि मुखेन निषेध

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुखेन चाधि कारिणं निर्धारयन् ग्रन्थस्य परमोपसंहारं कण्ठतो दर्शयति–

'प्रत्यक्षंचानु मानञ्च शास्त्रञ्च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मं शुद्धिमभीप्सता ।।

आर्षं धर्मोपदेशञ्च वेद शास्त्रा विरोधिना । यस्तर्केणानुसन्धत्ते सधर्मं वेद नेतर' इतिदिक् ।

सन्दर्भ ग्रन्थाः – १-मनुस्मृतिः
२-याज्ञवल्क्यस्मृतिः
३-न्यायमञ्जरी
४-उपनिषदः,
५-ब्रह्मसूत्र शा० भाष्यम्,
६-महाभारतम्,
७-मत्स्य पुराणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेदः अतिमहत्वपूर्णज्ञानज्योतिरस्ति ।

छविलाल पोखरेल

वेदोऽखिलो धर्ममूलम्(मनु २।६)उक्तम् अस्माभिरपठितैरेव न प्रायशः पठितैरपि विद्वद्भिस्तथा वेद मन्त्रमेकमपि अजानद्भिरपि ब्राह्मणैःक्षत्रियैरपि विवाहादौ शुक्लयजुर्वेद माध्यन्दिनवाजसनेय शाखाध्यायी इति पदवी सर्वेभ्यः पुरोहितेभ्यः प्राप्यतेस्म इतिमहान् आश्चर्यविषयः । गायत्रीमन्त्रोपि अर्थ रहितो ब्राह्मणैरेवश्रूयतेस्म, क्षत्रियेभ्योऽन्ये मन्त्रा दीयन्तेस्म । सर्वेषां वा गायत्रीमित्युक्तिरपि नदियतेस्म !

वेदशब्दस्यार्थः

वेदशब्दो विद्धातो निष्पन्नः । तस्य धातोर्विद ज्ञाने, विद विचारणे,विद्लृ-लाभे, विद सत्तायाम् इति चत्वारो अर्थाः प्रकटिताः सन्ति । अतो वेदा ज्ज्ञानं ततो नाना विद्या विचारा जायन्ते, ततो लाभो भवति,ततो मनुष्याणां सह अस्तित्वं च संपद्यते, इत्यर्थानुरूपा मन्त्रा दृश्यन्ते यद्यपि वेदा अद्य पर्यन्तमपि अर्थं विनैव प्रायशो गुरू शिष्यपरम्परया अभ्यस्ताः सस्वरा एव अस्माभिरपिप्राप्ता इति महत्सौभाग्यम् ।वेदध्वनिना अपिलाभो न विद्यत इति वक्तुं न शक्यते , अत एव गायत्रीपुरश्चरणानि वेदरामायणमहाभारत-गीता सहस्रनामादीनां पारायणानि विधिश्रद्धापूर्वकं संपाद्यन्ते ।

वैदाध्ययनमर्थसहितमवेति वेदमन्त्रैरेव स्पष्टमुक्तम् यथा-उतत्व पश्यन्न ददर्श वाचम् उतत्वः शृण्वन्न शृणोत्येनाम् । उतोत्वस्मै तन्वं विसस्रे जायेव पत्ये उशतां सुवासाः(ऋक् १।१६४।४०) कश्चिदर्थमजानन् मन्त्रमात्रं वा जानाति तस्यमन्त्रदर्शनं ज्ञानं च अदर्शनमिव भवति, यो अर्थसहितं जानाति तदर्थं मन्त्रामन्त्र- स्थितं ज्ञानं जाया-पत्यर्थमिव प्रकटी कुर्वन्ति ।

निरुक्तेऽपि "यदधीतमविज्ञातं निगदेनैव शब्यते । अनग्नाविव शुष्केधो न तज्ज्वलति कर्हि चित्" इत्यादिना अवश्यं व्याकरणनिरुक्तादिभिर्मन्त्रार्थाज्ञातव्या इत्युक्तम् । इत्यादिकं व्याकरणमहाभाष्ये प्रथमाह्निकारम्भे एव स्पष्टम् ।

उप प्राध्यापकः पिण्डेश्वरविद्यापीठस्थ धरान

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेदशब्देन केषां ग्रहणम् ?

मन्त्रभागो ब्राह्मणम्, उपनिषदश्च वहुषु ग्रन्थेषु वेदा लिखिताः । किन्तु महाभाष्ये चतुर्णां वेदानामेव आद्यमन्त्राणामुल्लेखान् ते चत्वार एव मन्त्रभागा वेदाः । ब्राह्मणानि तु ब्रह्मणो वेदस्य व्याख्यानानि एव । यद्यपि मीमांसासूत्र - ब्रह्मसूत्र- श्रौतसूत्र- गृहसूत्रादिभिः श्रुतिशब्देन ब्राह्मणवाक्यानि अपिउल्लिख्य प्रमाणानि दर्शितानि। तथा मन्त्र ब्राह्मणयोर्वेदनामधेयमिति च तथापि मन्त्रब्राह्मणयोर्मन्त्रवलं प्रयोगित्वात् (कात्यायन श्रौतम् अथर्वेद पृष्ठ ७) सूत्रेणैव अन्तिमं प्रमाणं मन्त्रभाग एव उक्तः । अस्माकं विचारेऽपि प्रत्ययरनर्हा असंभाव्याः - अतिक्रूरतापूर्णाश्च कथा ब्राह्मण - ग्रन्थेषु स्पष्टमुक्ताः । असंभाव्यकथाया एकमुदाहरणं यथा शतपथब्राह्मणे प्रथम काण्डे यजमानं विदेघ नामानम् पुरोहित आह्वयति किन्तु समीपस्थो विदे- घो नोन्तरं ददाति यदा "तं त्वा घृतस्नवीमह" इति मन्त्रमुच्चार्य आह्वयति तदैव उत्तरं ददाति,ततः पुरोहितेन पूर्वं किमर्थमुत्तरं न दत्तम् इति पृष्टो विदेघः पूर्वं मम मुखे अग्निरासीत् उच्चारणे कृते निर्गच्छेदितिभयेन उत्तरं न दत्तम्, किन्तु यदा घृतशब्दयुक्तं मन्त्रमुच्चार्यत्वया अस्माहतस्ततक्षणा- देव मुखादग्निर्निर्गत्य घृतशब्दानुसारेण चलितः, इत्युक्तम् । यज्ञे घृतस्य महत्वं दर्शयितुं तादृशी असंभाव्या कथा कथिता ।

अतिक्रूरता पूर्णा अन्याकथा— प्रथमकाण्डे एव कुक्कुटोऽसि इतिमन्त्रमुच्चार्य यज्ञपात्राणां संघर्षेण शब्दः प्रकटनीयः, इत्युक्त्वा कथा उच्यते— मनोरेकोवृषभ आसीत् तस्यशब्दस्य श्रवणेनैव असुराणामतिकष्टं भवतिस्म । किलाताकुलिनामकौ असुरपुरोहितौ आस्ताम् । वृषभशब्दसमाह्यर्थं वृषभ एवस समोपनीयः तदर्थं तेनैव वृषभेण यज्ञम् आवां कारयाव इति मनुः कथनीयः यज्ञविषये श्रद्धालुत्वाद् मन्येत एव, इति संमन्य गतव- न्तौ, मनुनापि यज्ञः स्वीकृतः, किन्तु वृषभाभावेऽपि सशब्दोमनोर्जायायां प्रविष्टत्वात् तस्याः शब्दश्रवणेनैव असुराणां पूर्ववदतिकष्टंजातम् । तदानीमपितायां गत्वा अनया तव जायया आवां त्वां याजयाव इत्युक्त मनुनाऽपि स्वीकृतम् । मनुजायाया अभावेऽपि सशब्दो यज्ञपात्रेषु प्रवि ष्टेऽति अतोऽसुराणां दूरीकरणार्थं यज्ञपात्राणां संघर्षेण शब्द उत्पादनीयः । इत्यादिका क्रूरतापूर्णाः प्रत्ययानर्हाः कथास्तु तत्र तत्र दृश्यन्ते अतो मीमांसा सूत्रशका न सत्य अथवदाएव (मी .सू . ४ । ३ १०) इत्युक्तम् अन्यत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अप्राप्य व्यावहारिकी हृदयस्पर्शिनी अत्युपयोगिनी उक्तिरपि ब्राह्मणग्रन्थेषु यत्र तत्र प्राप्यते तदनुसारेणैव अत्युत्तमा धार्मिकाः सामाजिकाश्च पञ्चम–हायज्ञादयः पठनपाठनसमाजसेवादयश्चविषया उक्त दृश्यन्ते, किन्तु अन्यत्र स्मृत्यादौ तादृशी हृदयग्राहिणी उक्तिर्न दृश्यते । यथा प्रथमकाण्डे शतपथ-ब्राह्मण एव " ऋणह जायते योऽस्ति सजायमान एव देवेभ्यः ऋषिभ्यः पितृभ्यो मनुष्येभ्यः अथ यदेवानूब्रुवीत तेनर्षिभ्य ऋणं जायते२ ऋषीणां निधिगोप इति ह्यनु चानमाहुः ।

अथ यदेव वासयते तेन मनुष्येभ्य ऋणं जायते यदेवतान्वासयते, यदेभ्यो ऽशनंददाति । य एतानि सर्वाणि करोति सकृतकर्मा तस्य सर्वमाप्तं सर्वं जितम् (३) (शतपथब्राह्मणम् १। ७ ।३)अर्थात् मनुष्याणां जन्म चतुर्णां संमान्यानामृणेन सहैवभवति , ते च मान्या देवा ऋषय पितरो मनुष्याश्च सन्ति । यज्ञादिनादेवर्णात् सन्तानोत्पत्या पितृऋणान् मुच्यते, अध्ययनेन यदा अनुचाने (स्नातकः) भवति तदा ऋषिऋणान्मुक्तो भवति । यदामनुष्याणां-भावासभोजनादि प्रबन्धं करोति तदा मनुष्याणामृणान्मुक्तौ भवति, इत्युक्तम् । तस्मिन्नेव ब्राह्मणे पञ्चमहायज्ञा अप्युक्ताः । तेषु चत्वारो यज्ञा ऋण नाम्नाउक्ता एव एकः पुनर्यज्ञनाम्ना उच्यते तत्रभूतयज्ञोगवादिपशू-नामुत्कृष्ट रूपेण पालनमधिकमायाति । पूर्वं पठनेन ऋषिऋणान्मुक्तो ऽपि पुरूषः ऋषियज्ञार्थं शास्त्रपर्यालोचनादिकरोति । पूर्वमावासाशनदानादिना मनुष्यर्णान्मुक्तोऽपि पुरूषः प्रतिदिनं मनुष्यर्णमुन्नत्यर्थं मनुष्ययज्ञनाम्ना स्वश-क्त्यनुसारेण किंचिदन्नं वा पृथक्कर्तव्यमिति तदाशयो भवति । इत्यादिकः सामाजिक उन्नतो व्यवहारस्तत्रदृश्यते बोधनशैलीचअनुपमेयाविद्यते । वेदेमन्त्र-भागेऽपि उपार्जितं धनमदत्त्वामुच्यते चेत्यायमेव भुज्यते, इतिच केवाला द्यो भवति केवलादी (ऋक् १० । ११७ । ५) इत्यनेन उक्तम् ।

---

(१) द्रव्यसंस्कार कर्मसु फलश्रुतिरर्थवादः (मीमांसासूत्रम् ४ ।३ । १०

(२) जायते इत्यस्य वितीर्णं भवतीत्यर्थः ।

(३) ऋषिऋणान्मुक्तौ विद्वान्भवति, देवर्णान्मुक्त्या आस्तिकता ऽ गच्छेत् । पितृ ऋणान्मुक्त्या शोभनं गार्हस्थम् । मनुष्याणांन्मुक्त्यर्थमुत्कृष्ट । समाजसेवा विधेया।इति चतुर्णां कर्मणां संपादनाद्यशस्वीसंमान्योभवति। कृतकर्मा, तेन सर्वमाप्तमिति सत्यमेव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मिन्सूक्ते अष्टभिर्मन्त्रैरावश्यकतां विचार्य अवश्यं दातव्यमित्युक्तम् ।

मन्त्रभागे तु असंभाव्या कू्रतायुक्ताश्च कथा न सन्ति सत्यं यथार्थं वस्तु प्रकटयते । यजुर्वेदस्य उपसंहारः अन्तिमश्चत्वारिंश-तमोऽध्यायोवैदिकसिद्धान्तप्रतिपादकोऽतिम पनीयः सप्तदशमन्त्रात्मकोविद्यते । तत्र-प्रथमं मन्त्रत्रयं कर्मयोगमुपादिशति । तत एकादश मन्त्रा ज्ञानयोगं वोधयन्ति अन्तिममन्त्रत्रयं च उपासनात्मकं भक्तियोगं प्रकटयति । गीतातु एतस्यैव व्याख्येति वक्तुं शक्यते । एवमेव ऋग्वेदस्योपसंहारेण अन्तिमेन मन्त्रत्रयेण सर्वान् मानवानुद्दिश्य"संवद्दृतिर्युष्माभिः परस्परं विचारस्यादानप्रदानाभ्यां सत्कर्मणा सर्वेषां मानवानामुन्नतये यतितव्यम् इत्याद्युपदेशः संगच्छध्वं संवदध्वम् इत्यादिरूपेण वृत्तिः,, अन्तिमेन समानमस्तु वो मनो यथा वः सुसहासति,, इति मन्त्रेण यथा युष्माकं सहास्तित्वं स्यात्तथा समानता विधेयेत्युक्तम् ।

एवं च विंशति संख्याकैरेव मन्त्रैः सर्वमानवसापेक्षो वैदिकः सिद्धान्तः संक्षेपेण उक्तः । किन्तु मध्यकाले ईशाद्युपनिषदः संसारान्मुक्तये इतिभ्रमो व्याप्तः । किन्तु मन्त्रणामर्थ विषये

महान् मतभेदः ।

अतएव अन्यैर्विद्वद्भिरेव कृतै र्मन्त्रार्थैर्न सन्तोषो विधेयः । स्वयमेव व्याकरणानिरुक्तमनुसृत्य अन्यैः कृतां व्याख्यां च पर्यालोच्य मन्त्रार्थकरणादेव मन्त्रार्थस्यस्फुरणं सम्यग्भविष्यति । ततो लाभः प्राप्तुं च पार्यते ।

यथा उदाहरणानि

स्वामी करपात्री हरिहरानन्दो महान्विद्वानितिविद्वांसो जानन्त्येव । तेन विदुषा लिखिते विचारपीयूषग्रन्थे ३२ पृष्ठे ईशावास्यमिति मन्त्रस्य अर्थः कपोलकल्पितो यथा– ब्रह्मसाक्षात्कार द्वारा प्रपञ्चको वाधित कर और त्याग द्वारा ब्रह्मनिष्ठा सुदृढकर आत्माको जन्म मरणके प्रवाहमे पडने से वचाकर मोक्ष प्राप्त करो"(१) इति लिखितम् । जगद्गुरुणा शङ्कराचार्येणापि

१ अति धनिन एव ब्रह्मसात्कारेण मोक्षंवाञ्छन्ति । दरिद्रास्तु दारिद्र्यादेव कथंमोक्षः इति चिन्तातुरा दृश्यन्ते । स्वामिना करपात्रिणा धनिनामिच्छानुकूलोऽर्थो लिखित इव भाति । अस्माभिस्तु सर्वेषु जीवेषु ईश्वर व्याप्ति सत्त्वात् तदर्थं त्यागपूर्वकं भोगो विधेयः, कस्यापि धने लोभो न विधेयः, अर्थात् आर्थिक भ्रष्टाचारो न विधेयः । इत्यर्थः क्रियते । इति संक्षेपः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मिथ्याविषयां गृधि माकांक्षीरित्यादिकमुक्तम् , शब्दार्थः समीचीनः कृतः किन्तु स्वदर्शनेन जगन्मिथ्यावादेन मिश्रितत्वाद् दुर्बोधोदृश्यते जगद्गुरुणा कुर्वन्नेवेह कर्माणि,, इति द्वितीयमन्त्रे कर्माणीत्यस्य अग्निहोत्रादीनीत्यर्थ उक्तः, अधुना काष्ठमण्डपे द्वित्रैरेव अग्निहोत्रं क्रियते, पुरा तस्य कर्मणोऽनिवार्यत्वेऽपि अधुना नियमस्य काठिन्यादेवस्यात् तत्कर्म लुप्तप्रायं दृश्यते । अतो दयानन्द सरस्वतीप्रभृतिभिः कर्मशब्दस्य सत्कर्म अर्थः कृतः । सत्कर्मकर्तरिनरे कर्मलेपोन भवति इत्युक्तम् किन्तु वेददूषकैः कैश्चित्पाश्चात्यैः सुरेन्द्रराजशर्मण च वेदोपनिषदां दूषणाय अति अनुचिता अपि अर्थाः प्रकटिताः । यथा उदाहरणम्– सन् १९८७ अटूक्वर द्वतीयपृष्ठ ५७ ले. डा. सुरेन्द्रराजशर्मा, सरिता (हिन्दी) "ईश उपनिषद्का कहना है कि "ब्रह्मज्ञानी कोईभी काम करे वह उससे लिप्त नहीं होता" एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे (४०।२) तत्रैव हिटलरेण निरपराधानां बहुसंख्यकानां मनुष्याणां या हत्याविहिता तत्र कारणमपि तादृशशोपनिषदां प्रभाव एव इत्यपि लिखितम् सर्वं प्राणिषु मैत्री भावना दानादिकं च मन्त्रैरुक्त्वा सत्कर्माणि प्रकटीकृतानि ।असत्कर्माणि च बहुभिर्मन्त्रैरुक्तानि । द्वित्रामन्त्रालिख्यन्ते–सप्त मर्यादाः कवयस्तक्षुस्तासामेकामिदभ्यंहुरो गात् (ऋक्१०।५।६) ज्ञानिभिर्मुनिभिः सप्त दुर्व्यसनानि कथितानि तेषां मध्ये एकस्यैव दुर्व्यसनस्य करणेऽपि पापीभवति । सप्त दुर्व्यसनस्यमध्ये प्रथमं मद्यपानम्, द्यूतम्, पतिपत्नीव्यतिरिक्ते व्यभिचारः, मृगया, क्रोधावेशेन दुर्वाच्यकथनम्, ताडनम्; आर्थिकभ्रष्टाचारश्चेति ।अन्योऽपि मन्त्रः,, न सः स्वो दक्षो वरुणः ध्रुतिः सासुराः मन्युर्विभीदको अचित्ति अस्ति ज्यायान् कनियस उपारे स्वप्नश्चनेदनृतस्य प्रयोता (ऋक्. ७।८६।६) अति चाञ्चल्यम्, सुरापानम्, क्रोधावेशः द्यूतम्; अज्ञानम् दुर्जनसंगतिः यदिमाःयो जनो दुर्व्यसनी चे -तदनुसारेण अन्येऽपि बहवो दुर्व्यसनिनोभवन्ति , दुर्व्यसनपरिचयानन्तरमपि तत्त्यागायसावधानता न भवेच्चेत्पुनरपि दुर्व्यसनी भवेत् । एतानि दुर्व्यसनान्येव मनुष्याननेक सन्मार्गेनयन्ति ।

दुर्व्यसनदूरीकरणेतेजस्विता

दुर्व्यसनदूरीकरणे तेजस्वितायाा आवश्यकताविद्यते । अत एव गीतायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षोडशे ऽध्याये षड्विंशतिसद्गुणमध्ये तेजः क्षमेत्यादि गणयित्वा दैवीं संपत्तिमुक्त्वा तद्गुणयुक्तो देवः। ईहन्तेकामभोगार्थमन्यायेनार्थसंचयान् (गीता) १६।१२, अन्यायेन धनराशिं कुर्वन्नेव असुरः [राक्षसः] इत्युक्तम् । असुरराक्षसैः सह अथवा दुराचारसदाचारयोर्विरोधः शाश्वतिकोविद्यते एव । अन्यायस्यविरोधेतेजस्विना सद्गुणः । मद्यपानं सर्वप्रथमंदुर्व्यसनमेववर्धमानमस्ति ।

मनुना पञ्चमहापातकमध्ये सुरापानमपि (ब्रह्महत्या सुरापानं स्तेयम् (मनु ११।५४) इत्यादिना गणितम् । वेद नाम्ना एव मा. वि. (९।१०) कक्षायामितिहासपाठ्यपुस्तके [२ पृष्ठे १६८–१७२] वैदिकाः सुरापानं कुर्वन्तिस्म , वहुदेवताः पूजयन्तिस्म, एकईश्वरोस्ति इति तु ईशवीयसंवत्सरात्पूर्वं मिश्रदेशोयेनअरवनाम्नेनोक्तमिति नेपालीयाच्छात्राः पाठ्यन्ते । वयं संस्कृतज्ञास्तु व्याकरणन्यायमीमांसादिषु परिश्रान्ता वेदमन्त्रार्थप्रकाशनेऽपि पापं पश्यन्तः केचन केचन असमर्था इवस्थिताः स्म, विरोधस्तु दूरभास्ताम् । अतो म. सं. विश्वविद्यालयेन तादृशदुर्व्यसनस्यापि वेदनाम्ना समर्थकं पाठ्यांशं दूरीकर्तुं महान्प्रयत्नो विधेयः ।

अन्यच्च, नत्वेवामांसो अर्थः स्यात् ।

भवभूतिरचिते उत्तररामचरिते नत्वेव अमांसो अर्घः स्यात् पूजार्हाणां पूजार्थं (भोजनादिनीसत्कार्थे)पूजार्थादि पदार्था मांससहिताः कर्तव्याः,इत्यर्थकं वाक्यं दृष्टम् । कुत्रत्यंवाक्यम् ? इति जिज्ञासया अन्वेषणे तद्वाक्यं पारस्करगृह्यसूत्रे विवाहप्रकरणे दृष्टम् । तत्र गौर्गौगौरित्यन्तरं माता रुद्राणामत्यादि ऋग्मन्त्रम् (८।१०१।१५) उच्चार्य तन्मांसेन अर्घ इति प्रकटयते । भवभूतिनाऽपि वसिष्ठस्य कृते कपिला मड मडायिता इत्यपि लिखितम् । किन्तु उक्तस्य ऋग्मन्त्रस्य लुमा गामनागामदितिं बधिष्ट, अर्थात् रुद्रादित्यवसुभिरपि दुहितृस्वसृरूपेण सम्मानितायागोर्वधो न विधेयः , इत्यर्थः समायाति । एवमेव गोविषये अघ्यानामदत्त्वां उक्ता बहवो मन्त्राःवेदेषु दृश्यन्ते ।

अश्वस्यगोश्चवधे मनुष्यवधे इव मृत्युदण्ड आसीदिति

यदिनो गां हंसियद्यश्वं यदि पूरुषम् ।
तं त्वा सीसेन विध्यायो यथा नोऽसो अवीर हा ।।

(अथर्व ५।१६।७) इति मन्त्रेणोक्तम् । कर्मकाण्डे श्रौतसूत्रेषु गृह्यसूत्रेषु च नानाविधाः पशुहिंसात्मका यज्ञा दृश्यन्ते । यज्ञेपशुवधे हिंसा न भवति पशुः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वर्गं गच्छति, यजमानस्य च इच्छापूर्तिर्भवति इति धारणा आसीत् । भगवतो बुद्धस्य विरोधेन हिंसात्मका यज्ञाः समाप्ताः । मन्दिरे पशुबलिर्दृश्यते एवाः यद्यपि "प्रसीद मातर्जगतोऽखिलस्य,, (सप्तशती अ. ११।२) सर्पादिपशु – व्यतिरिक्ता कापिमाता स्वसन्मानान्न खादति, जगन्माता कथं पशुबलि खादेत् ? । वस्तुतस्तु, यदि सर्वे अहिंसकाः स्युस्तर्हि दुष्टानां हत्याकारिणां दमनमपि कथं कर्तुं शक्येत एवं वेदमन्त्रैरवध्यत्वेन उक्तानां गवां हिंसानिवारणे हिन्दू सनातनधर्मः सफलो जातः । किन्तु वेदमन्त्रैर्निषिद्धानां मद्यपानाथिकभ्रष्टाचारद्युतादीनां निवारणं न क्रियते चेद्देशविकासो उद्योगीकरणेन दारिद्र्यनाशश्च रेवपुष्पायमाण इव दृश्यते ।

अन्यच्च– अमङ्गलानां सर्वेषां विधवा अन्यमङ्गला, इति पुरुषोत्तममासमाहात्म्या इवा केन स्यात् ? यात्रादौ विवाहादौ च शुभकार्ये विधवादर्शनममङ्गलकारि अपशकुनमिति ता दूरी क्रियन्तेस्म । किन्तु वेदमन्त्रेषु मन्वादौ चादर्शनात् अनुभवविरोधाच्च विधवानामपशकुनत्वविश्वासः अन्धपरंपरात्वात्त्याज्य एव । एकेन प्रसिद्धेनप्राध्यापकेन विश्वइतिहासको रूपरेखा नाम्नि पुस्तके संस्करण २ पृष्ठे १४ वेदमा कहीं पनि चामलको वर्णन छैन । पृष्ठे १५ तिनीहरूलाई चामलको ज्ञान थिएन । इत्यादिकमत्यसत्यं लिखितम् । किन्तु यजुषि ब्रीहयश्च मे (यजु१८ । १२) अथर्ववेदे (११।३।५।६) तण्डुलाः कणाः, तुषाश्च लिखिताः । ऋग्वेदे (८।७७।६) पयःपक्वमोदनम् क्षरिपाकमोदनम् चास्ति अपिच ९ । १० कक्षाया नेपाली नामके पाठ्यपुस्तके महादेवेन वृष्टि निवारणं कर्तुं नशक्तम् इत्यपि पाठ्यते । वयं शिवं महादेवनाम्ना स्तुवन्त एवस्म । प्रज्ञाप्रतिष्ठानात्प्रकाशितायां वि. सं ०४०वैशाख ज्येष्ठाषाढेति त्रैमासिके प्रज्ञापत्रिकायां शिवेति शीर्षके शिवशब्दऋग्वेदे नास्ति, रुद्रशब्दएवास्ति । रुद्रस्तु पितृदुहित्रोर्यौनसंवन्धेनोत्पन्नः । वेदेलिङ्गपूजकाः शत्रवः कथिता इत्यादिकं वेदविरूद्धमत्यसत्यं प्रकाशितम् । वस्तुतस्तु शिवस्य रुद्रस्य चएकस्मिन्नृग्मन्त्रे (ऋक्. १०।९२।९) स्तुतिः स्पष्टैवास्ति । पितृदुहित्रोर्यौनसम्वन्धे भ्रमोद्वित्रै ऋगथर्वमन्त्रैः स्वल्पज्ञानामेवभवति । वेददूषकैर्विरोधिभिस्तु डिंडिमघोषेण असन्तो भ्रमा उत्पाद्यन्ते । सद्विचारकाणामपिसायणादिनांभाष्येषु च स्वल्पास्त्रुटयो मत्कृते वैदिकसिद्धान्तनामकेपुस्तके प्रकटिताः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्त्रास्तु अत्रापिता दुहितुर्गभमाधात् " (१ । १६४।३२)इत्येवंरूपा ऋगथर्व-मन्त्रा दृश्यन्ते । तस्यमन्त्रस्यपूर्वार्धंतु– द्यौर्मे पिता जनिता नाभिरत्र वन्धु र्मे– माता पृथिवी महोयम् ।। इति । अत्रद्यौराकाशम् , सूर्यो वा गृह्यते । कुत्र–चित् पिताप्रजापतिः दुहिताद्यौः (आकाशम्) पुत्रः सूर्यः । कुत्रचित्पिता सूर्यो-दुहितादिन् उषा पृथिवो वा गर्भधारणाद् वृष्टयादिकं भवति । प्रजापतेर्दुहि–तरि दिवि गर्भाधानात्सूर्य उत्पन्नः । दिवस्पुत्रायसूर्याय संशत (यजु. ४।३५।) इति प्पटम् ।

चतुर्ष्वपि वेदेषु लिङ्ग पूजैव नास्ति ।

ऋग्मन्त्रे (७।३१।५) शिश्नदेवाः शब्दो अस्ति । तस्य निरुक्ते सायणभाष्ये च अब्रह्मचर्याः (अनैतिक व्यवहारिणो महत्त्वपूर्ण पदेनस्थाप्याः, इति महत्त्वपूर्ण उपदेशो विहितः ।

उपसंहारः

केचन वेदविषयेपूर्वकालादेव अस्मासुस्थितामतिः महतीं श्रद्धां मन-स्तएव उद्धृत्यद्वेषभावस्य विवर्धयिषया एव वेदमन्त्रार्थं विकृतं लिखन्त आसन् । केचनाधुना पाश्चात्यैरपिप्रभाविताः स्वयं च तन्मार्गे स्थिता आसन्, अधुनापि सुरेन्द्रराजशर्मणो लेखउदाहरणार्थं प्रकटितः । केचन पी. एच्. डी. पदं, वा विद्वत्सुप्रतिष्ठां पुरस्कारं पदोन्नतिं वा प्राप्तुं स्वयं वेदपुस्तकमप्यदृष्ट्वैव वेदमन्त्रार्थं मन्येषा सत्यमसत्यं वा निर्णेतुमसमर्था अपि अतिविकृतमर्थं कुर्वन्तो दृश्यन्ते ।

अतो महेन्द्रसंस्कृतविश्वविद्यालयेन वेदश्रद्धाविघातकस्य तु वेदविद्रो-हिसमाजोत्पादकः प्रहारो न सोढव्यः । तेजस्विता प्रकटनीया । वोर्डिङ्स्कूलेषु अन्येषु मा. वि. पर्यन्तेषु स्कूलेषु च नानाभाषाणां पाठ्यपुस्तकानिपर्यालोच्य वैचारिक प्रहारदूरी करणाय प्रयत्नो विधेयः । तदर्थं च डा. स्वामी प्रपन्ना-चार्यसदृशैर्योविद्वद्भ्यः सहायता प्राप्तुं शक्यते ।

००००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कवि समयस्थापनाया वृत्तम्--

रोहिणीवल्लभ शर्मा पोखरेलः ✍

" अपारे काव्यसंसारे कविरेक प्रजापतिः ।
यथास्मै रोचते विश्वं तथैतत्परिवर्तते । " इति प्राचां वादःप्रथते । तदेवं कविः परमेष्ठिसर्गतो विलक्षणं जगत्सृष्टिं विधावतिशेते । स्वकृतेः काव्यप्रकाशस्य मङ्गलं श्लोकयताऽऽचार्यमम्मटभट्टेन कविसर्गप्रकृतिरित्थं पर्यभाषि–" नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् , नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयती,,– ति । तदेवं कवेः कापि निरतिशयप्रभावा शक्तिः प्रभवति, यद्विलासेन विलसितः कविचेतनः प्रभाविकः प्रकामानन्द-सन्दोहमयीं वागर्थसंसृतिमानन्दब्रह्मकल्पं प्रतितिष्ठति ।

अपरिमेयशर्ममर्ममधुरिम्नाऽऽस्वदमानो वागर्थसाहित्यवपुःकौशलसर्गः स्वयस्थाः कीर्तेरथ च दुरवापस्यापवर्गवर्गस्य स्रोतोमूर्त्या प्रस्रियमाणो रामादिवत्प्रवर्तितव्यम्, न रावणादिवत्" इत्याकारकं सामाजिकजीवनादर्शं प्रस्तुवन् स्फुरति । सोऽयं सर्गः श्रुतिवाङ्मयमश्नुवानोऽपि रामायण-महाभारताद्याख्यानतत्त्वमुपजीव्यतयाऽऽत्मसात् विधायाभिव्यक्ताश्चित्सुखैकास्वादि प्रकृतिसंवाहनमारुह्य जगच्चेतांसि विनयन् सम्राजति, अविवेकामयं च निरस्यतीति संस्थितम् ।

अविद्याव्याधिनाशकत्वं शास्त्रस्य,अविवेक गदापहारित्वं च काव्यस्येति स्वाभाविको धर्मो वृत्तिश्च संस्तुते प्रतिभातः । तथा हि शास्त्रं नाम प्रभादिप्रभुसंमिता संवैधानिकी व्यवस्थितिः, काव्यं तु कान्तोदन्तनिभया वल्गुवाचा स्वाभिमुखीकरणप्रकृतिकमिति स्फुरति । तदेवं शास्त्रकाव्ययोः पृथक् पृथक्प्रकारा पद्धतिरुज्जृम्भते, तदपि दुग्ध-घृत न्यायेन शास्त्रं जीवातुः काव्यस्येति

✍ उप.प्राध्यापकः, या. व. ल. ना. विद्यापीठस्य।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वरीयान् समीक्षकः कविराड्राजशेखरः समैक्षत । शास्त्रज्ञानमन्तरा, काव्यबन्धः शर्मणे फलाय न कल्पते, प्रत्युतोन्मत्त प्रलापवच्चेतोविषादयति, मतिं विकलयति चेति–

काव्यं कवयितुः कवेरविभाव्यप्रभावाऽस्ति काचिच्छक्तिर्विपुलायामा, सा च "परिकल्पने"– ति प्रनीता प्रसरति । यल्लेखयाऽऽमृष्टं तस्य स्वान्तं विधिविधातिशायिनं सर्गमाततनितुं समुत्सहमानं दृश्यविश्वपदार्थजातं विलक्षणात्मतया सम्भाव्य समुपादानीकरोति, तथैवं सुचिरस्यापि जगतो भावो नित्यं नवनवामाकूतिं रुचिं च विभ्रल्लोकातिशायिमहिम्ना जनमनः प्रह्लादयन्नुपतिष्ठते, परिशीलनविधया समुज्जृम्भमाणो विच्छित्तिभूमिकां प्रस्तौति । चिदानन्दभरोद्गारमुखेन परिस्पन्दमाना सेयं कल्पनेतिस्रुतिरभिनवप्रणाल्या स्यन्दमाना संप्रेषणीयतां प्रवर्तयति, प्रतीकविधानमाविष्करोति, समुदारीकृतभाववैशद्यं समुपहरति । तदेवं शब्दार्थसंयोगच्छदामास्तृणन्ती चेयं कविव्यापृतिं प्रथयति ।

कविव्यापृतिर्नाम व्यक्तस्याव्यक्तस्य च यावज्जागतिकस्य पदार्थजातस्य गूढोत्मानं भावाभिव्यक्तिं समक्षमिव प्रस्तुत्य प्रतीकविधानदाक्ष्येण तन्मर्मभूतमुदारं तत्त्वमुपस्थापयति । अत्र पक्षाश्रयिणी वृत्तिर्नोज्जृम्भते । तद्वित्थं क्रान्तदर्शित्वेन विभावितं तद्गतत्त्वेन परिस्पन्दितं विभावनं जीवानुप्रकृत्या विभासते । हृदयस्पर्शि पुनराह्लादि स्वारस्यजगत् द्रुतिविधिमादधत् शब्दार्थयोः सन्निवेशचारुतामुखेन कौशलसात्मसाद्विधाय विच्छित्तिविशेषाधानगतिमाकलयति । इत्थममूर्तोऽपि भावो वागर्थसामञ्जस्यवशान्मूर्त इव प्रतिभासमानो द्रवोऽप्ययं काठिन्यरुचिमुपास्यमानः, चेतनोऽप्यसौ निश्चेतन इवाभिपद्यमानोऽनुभूयते । एवं हि कवेः कर्मणः स्वरूपेण प्रतीतं काव्यं नाम प्रस्तुतिर्गुणसंस्कृतशब्दार्थसाहित्यमहिम्ना प्रतिकात्मक कमनीयतातिशयोद्भासिनैतिकवृत्तिमद्रचनावैचित्र्य वपुर्वाच्यमिति सन्तिष्ठते । तदत्र संस्थायां साधारणोऽपि विषयवस्तुप्रकारो विलक्षणात्मतयाऽवतिष्ठमानः पुरातनमपि तरूणयन् दृष्टपूर्वम–पि प्रव्यग्रयन् रस्यते चित्तिं स्पन्दयति च ।

एवं विभाव्यमानवपुषा प्रवर्तमानोऽयं कविकर्मणः प्रकारो न केवलं वस्तुनो भाव सामान्यवैलक्षण्यमपितु काव्यविषयतयाऽऽसज्जिता तदुपस्थितिः कविकल्पनाकौशलवशाल लोकातिशायिपरिग्रह भूमिकामासाद्य तदन्यथा भावाकृतिमत्तया स्फुरति पुनर्मनोग्राहितया स्वदते । अत्रा लौकिकचर्वणावति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधौ कविपरम्पराव्यवहारेण विनियोजितं क्रियश्चमत्कृतिजनकं वर्णनाप्रस्थानमपि स्वारस्यविधानसहकृत्वरी सामग्री सम्पद्यते तथैवं निरर्गला इव प्रतिभासमाना: कविवाच: सौन्दर्यम् , स्वारस्यमथ च तदन्त:स्थाभिनिवेशं च स्फुटमुपस्थापयितुं पुरत: प्रवर्तमाना: शास्त्रीयं लौकिकं चावस्थितिकं तत्तद्वस्तुन: परिग्रहपरिपाटीं चान्यथात्वेन परिगृह्य स्वयैवोपपत्त्या स्वरूपमवस्थां क्रियां च प्रस्तुवन्ति । तदेवं विधया छदयोपलाल्य गुम्फितो वागुपन्यासो वर्ण्यस्य वस्तुना विदूरागाहिनीमथ च सत्त्वोद्रिक्तं मन: समाराधयन्तीमर्थप्रकृतिं समुल्लास्य जगदाह्लादयति । एतया खल्वर्थप्रकृत्या शब्दसन्ततेर्मञ्जुलतमं सामञ्जस्यमासाद्य प्रकाशमाना रुचि: परा कविसम्पद् भवति , तया च समृद्धसामग्रिक: काव्यबन्ध: कान्तासम्मितवाक्कलयोदात्तजीवनादर्शं प्रस्तुवन् चिराय रस्यते । अपि चैवं चर्वणैकवपु: कियत्यर्थचमत्कृतिभित्ति: कविसमयाभिख्यानमलभत । कविसमयेनानेन च कविमार्ग: प्रशस्तभूमिको भवन् कविवागारम्भतो निरन्तं यावत् सुस्वादुन वैचित्र्यफूलाय कल्पते ।

शब्दमूर्त्या विवर्तमानस्य परात्मनो भगवतोंशाशकलया प्रतिभातस्य काव्यसाहित्यस्य मनोग्राहिबिम्बोपस्थापनात्मिका प्रशस्तमार्गविधिरयं कविसमयो नाम वर्णनावैशद्यप्रकृति: (कविपरम्पराव्यवहारसिद्धान्त इति यावत्) (१)वेदोपनि(२)षन्मन्त्रेषु रामायण(३)महाभारत(४)योरैतिहासिककाव्ययो: श्लोकव्यूहेषु, अश्वघोष(५) –कालिदासादीनां(६)महाकाव्य प्रभृति प्रबन्धेषु व्यप्ततापि भरत–भामह–दण्डि–वामन–रूद्रटाद्यालङ्कारिकाचार्याणां शास्त्रसन्दर्भे चर्चाप्राशस्त्यं नाऽऽसदत् । प्रत्युत भामहेन दण्डिना वामनेन च स्व-स्व-शास्त्रबन्धे देश-काल-कला-लोक-न्यायारामविरोधि लोक-विद्या-विरुद्धमिति यावत् ।

१–देवानां चक्षु: सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम् ऋ वे. उष: सूक्त मन्त्र ७ सू. ७७

२– – – – –

३–किङ्किणीजालसङ्काशास्ताहेमविपुलाम्बुजा: ।
भावग्राहा यशस्तीरा: सुप्ता नद्य इवावभु: वा.रा सु.का. ९५१

४–नां तु पुष्करिणीं रम्यां दिव्यसौगन्धिकावृताम् जानरूपमयै: पद्मै प्रच्छन्नां परम गन्धिभि: महा. वन १५३. ६

५–वैदूर्यनालानि च काञ्चनानि पद्मानि वज्राङ्कुरकेशराणि । स्पर्शक्षमण्युत्तमगन्धवन्ति . . . सौन्दरनन्द १०. २४

६–एक. सख्यास्तव सहमया वामपादाभिलाषी - - - मेघदूत उ मे० १८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्ण्यतत्त्वं काव्ये दुष्टमथ च वर्ज्यमिति समास्थापि १ । मुनिनाभरतेन स्वसन्दर्भे नाटयशास्त्रे रसानां वर्णव्यवस्था प्रत्यपादि२ । एतेन प्रतिपादनविधिना सुस्पष्ट-मेतदाभाति, यद् भरतमुनि: कविसमयाभिख्यानस्य सूत्रमसूत्रयदिति । अभिनव भारतीनामटीकाकृत अभिनवगुप्तपादा अपि रसानां वर्णव्यवस्थाऽऽग्रमोदिना पद्धतिरित्यटीकयन्३। अथैवं वेदादौ पुराणादौ शास्त्रे काव्ये च निरूढपदा कवि-समयाभिख्यानस्य स्थितिः सहृदय हृदय चर्वणीयतां वहतीति वस्तुभावाववबोध-संवेगसम्पदोऽपकर्षात् कविपरम्परोपनत वर्णनाभ्याख्यान प्रसङ्गतश्च कविवर्ण-नायाःसिद्धान्तव्यवस्था विगातुमनर्हा प्रत्युत तदास्थापनायास्तत्त्वं विमृश्य रह-स्यमुद्घाटनीयंभवति । कविकर्मसापेक्षतयाऽनपलपनीय मेतन्कविसमयाभिख्यानं कविरहस्यं नाम स्वनामधन्यं समीक्षासन्दर्भं प्रवध्य कविराड्राजशेखरः समीक्षा-श्चक्रे,समगृह्णाच्च । सोऽयं समीक्षकीं वाङमयारम्भतो व्यापृतमपि चिरादभि-धानविरहात् सुखस्वापमातत्य विघूर्णमानं स्वारस्याऽऽस्थानकं कविसिद्धान्ततत्त्वं प्रबोध्य काव्यबन्धस्य विलासाय काव्यमीमांसायां स्वशास्त्रे विधिविस्तारतो व्यवेचयत् । तथा हि–"अशास्त्रीयमलौकिकंचपरम्परायातं यमर्थमुपबध्नन्ति कव-यः स कविसमयः ४" इति। इत्थं प्रथमतः परिभाषामापन्नोऽयमुपबन्धनप्रकारः शास्त्रैरसम्मतं लोकैरव्यवहृतं गतानुगतिकतया प्रचलितं वस्त्वर्थोपन्यासं प्रस्तौति। एवंप्रकृत्या प्रथमं व्याहृतोऽप्ययं कविसमयः क्रान्तदर्शिनां मुनीनां कवीनां च शास्त्रेतिहासकाव्यसन्दर्भेषु समादृत पद इति समीक्ष्य राजशेखरो व्यश्लेष-यच्चेत्यम्–"पूर्वे हि विद्वांसः सहस्रशाखं साङ्गं च वेदमवगाह्य, शास्त्राणि चावबुध्य, देशान्तराणि द्वीपान्तराणि च परिभ्रम्य यानर्थानुपलभ्यः प्रणीतवन्तस्तेषां देशकालान्तरवशेनाऽन्यथात्वेऽपि तथात्वेनोपनिबन्धो यः स कविसमयः । कविसमयशब्दश्चाऽयं मूलमनश्यद्भिः प्रयोगमात्रदर्शिभिः प्रयुक्तो रूढश्च । तत्र कश्चिदाद्यत्वेन व्यव-स्थितः कविसमयेनार्थः कश्चित्परस्परोपक्रमार्थं स्वार्थाय धूर्तैः प्रवर्तितः । स च त्रिधा स्वर्ग्यो भौमः पातालीयश्च । स्वर्ग्य-पातालीयोर्भौमः प्रधानः, स

१-देशकालकलालोक न्यायागभविरोधि चेत्यादि- (भामहालङ्कारः४। २,काव्या-दर्शः४.३ (काव्यालङ्कार सूत्रवृः २.२३.२४

२-श्यामो भवति शृङ्गारःसितो हास्यः प्रकीर्तित इत्यादिः–नाटयशास्त्र ६.४२.४३

३-वर्णदैवतान्नक्रमपि आगमसिद्धत्वा , अभिनवभारती ना..शा.६.४५ वृत्तेष्टीका ।

४-काव्यमीमांसा अः १४ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हि महाविषयकः । स च चतुर्धा–जाति–द्रव्य–गुण–क्रियारूपार्थतया । तेऽपि प्रत्येकं त्रिधाऽसतो निबन्धनात्, सतोऽप्यनिबन्धनात् नियमतश्च (का. मी. १४) । ''. श्लोकिनोऽपि क्वापि– "असतोऽपि निबन्धेन सतामप्य-निबन्धनात् । नियमस्य पुरस्कारात् संप्रदायस्त्रिधा कवे"–रिति ।

अथैवं चिररात्राय वाचां सन्दर्भेन समाकलिनोऽपि कविसमयनामाऽयं नयः कविरहस्यात्मक "काव्यमीमांसा" त. प्राच्येष्वलङ्कारशास्त्रप्रबन्धेषु साहित्यविधाचार्यधुर्यतया समादृता - भिख्यानानां नन्दिकेश्वरादीनां मनीषिणां भरतनाट्यशास्त्रे स्मृतानां साहित्यमर्मविदां पुनश्च भामहीयेऽलङ्कारग्रन्थे ग्रथितानां बुधानां च विमर्शपद्धतयो ग्रन्थाश्च साम्प्रतं दुरवापा अपि भरतोक्त रसवर्ण व्यवस्थापनसन्दर्भतः प्रतिफलितः प्रतिभाति । एवं च कविसमयपरम्परायाः संस्तवः प्रत्यगात् । भामहाद्याचार्याणां वर्ज्यविधानतोऽपि कविसमयस्य काव्ये संस्थितिः सिध्यति । इत्थं सिध्यदवस्थितिकस्यापि कविसमयस्य परिभाषा विवेचना च नासाद्यते । अत्रैतत् सम्भावयितुं युज्यते यद्–भरतनाट्यशास्त्रतो रुद्रटालङ्कारशास्त्रं यावदेष समयः कविकर्मणो विलक्षणार्थधर्मतया वेदादि-शास्त्रतः पृथक्त्वमथचावश्यकर्तव्यत्वं च साधयितुं सन्नद्ध इति तदात्वे काव्य-प्रकृतेर्विमर्शप्रक्रियाया व्यपेक्षाऽपरिहार्यतया तदुपस्थापना च प्रामुख्यमभजत् ।

एतद्द्वयोः साधनीयत्वं लक्षीकृत्य तदानीन्तनाः शास्त्रतत्त्वविचारकाः प्रावर्तन्त । "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायाच्च व्यापकविधेः काव्यस्य गूढोत्मरहस्यं प्रस्तुत्य तदभिव्यक्तिकलायाः स्वरूपोद्देश्ययोः प्रथनक्रमे व्याप्यस्य वस्तुगतार्थोपपादनभङ्गीविशेषात्मकस्य कविसमयाख्यस्य मार्गस्य संस्थितिविचारो गौणतामासददिति सम्भवति । यतो हि काव्यं नाम प्रस्तु-त्यतिशय प्रकृत्याऽसन्प्रतीत्युपस्थापकं ग्रन्थनमित्युपेक्षणीयमिति विपक्षिणां विदूषणं प्रत्याख्यातुं सन्नद्धा आचार्याः काव्यस्य लोकानुरञ्ज–नप्रकृत्या ऽसंप्रवृत्तितः पराङ्मुखीकृत्य भावनात्मकसंस्कृतिमुखेन सन्प्र-वृत्तेः प्रवर्तमानाया ऽवश्यकर्तव्यतामथोपादेयतां च सदूहामोहैः साधयितुं सर्वतोभावेन समयुध्यन्त, तदेवं कविराड्राजशेखरतः काव्यनुशासनकृतं हेमचन्द्रं यावत् कविसमयनामेयं व्यवस्थापनापद्धतिः परिच्छिन्नप्रायाऽऽसाद्यमानाऽपि काव्यसंरचनाविधौ कविभिर्यथावसरं समुद्भाविनैवा ऽवलोक्यते । एवंविधायां काव्य संरचनाप्रकृतौ विचार्यमाणायामिदमग्रतः स्फुरति, यत् कविसमयो वाङ्मी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौशब्दस्य पुनर्विदूरावगाहिनोऽर्थतैव्यूस्य च हृदयहृदयावर्जकरूच्या प्रवृत्ता स्वाभाविकी रीतिः या हि शब्दार्थसामञ्जस्येन व्यक्तिभवदभिधेयमहिम्ना सामाजिकचेतांसि प्रह्लयन्ती विचारसरणिं स्वस्थयति विकासयति जीवनप्रकृतिं प्रशस्तयति च । "भावो हि भवकारणम्" इति प्राचां वादः प्रथमानः "काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च । शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः इति निगमयति ।"

कर्मण्येवाऽधिकारस्ते माफलेषु कदाचन ।

—श्रीमद्भगवद्गीता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यकारणभावसम्बन्धः

गिरिधर शरण शर्मा [a]

न्यायनये कार्यकारणभावसम्बन्धस्य विशेषचर्चा वर्तते । अयं सम्बन्धो न्यायशास्त्रसिद्धान्तानुसारी अस्ति । अनुमानमपि एतन्मूलकमेव कुर्वन्ति नैयायिकाः । यत्र कार्यकारण भावसम्बन्धस्य व्यत्यासस्तत्र नानुमानं समीचीनं भवति इति तेषां मतम् । एतत् सिद्धान्तपुरस्सरमेवानुमानं स्वीकुर्वन्तीति विचार्य विचारकैः नैयायिका आनुमानिका इति नामकरणं विहितम् । तार्किका इत्यपि नैयायिकानां नाम वर्तते, एतत्तु तर्कोपस्थापितवस्तुविवेचनपुरस्सरं कार्यकारणभावसम्बन्धं प्रदर्श्य साध्यसिद्धिविधायका इत्याद्यर्थे एव प्रयुक्तमिति अवगम्यते ।

न्यायनयानुसारेण प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणानि स्वीकृतानि सन्ति । तत्र कार्यकारणभावसम्बन्धस्य व्यवस्थापकं किं प्रमाणमेतेषु चतुर्षु इति जिज्ञासायां अनुमानमेव तत्साधकं प्रमाणमिति निश्चप्रचं वक्तुं शक्यते । एकत्रस्थले घटं विलोक्य तन्निर्माणोपयोगिनि चक्रदण्ड मृत्तिकादीनि वस्तूनि चावलोक्य समायान्तरे हाटकादिक्षेत्रे विक्रयार्थं स्थापितघटसमुदायं दृष्ट्वा अनुमातुं शक्यते यत् इमे घटाः कुलालकृतिजन्या वर्तन्ते, अन्यथा एतेषां आकृतिस्तारतम्यं, पूर्वमस्माभिः कुलालगृहे प्रत्यक्षितघटाकृतितः पृथक् एव स्यादिति , वर्तते च सादृश्यं घटेषु । एतेन कुलालसत्त्वे घटनिर्माणकार्यसत्त्वं तदभावे च घटनिर्माणप्रक्रियाविलोप इति कार्यकारणभावात्मकान्वय ज्ञानम् । अयमेव मार्गः शास्त्रप्रक्रियानिर्वाहकोऽस्ति यत् कारणातिरिक्ते नूतनजायमानवस्तुनि न किमपि प्रमाणं यत् यत् जायते जगतीतले तत् सर्वमपि कारणात्मकम् अस्ति इति स्फूटीकृतं भवति । यदि वयं ब्रूमः न किमपि कारणं वर्तते जगतः, दृश्यमानं चराचरात्मकं आब्रह्मसूक्ष्मकीटपर्यन्तमेतत् संसृतिजालं स्वभावतः सिद्धम् अस्ति, न कोऽप्येतस्य रचयिता संस्थापकश्च विद्यते । यथा चार्वाकाः वदन्ति

---

[a] पिण्डेश्वर-विद्यापीठस्य , धरान

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा वा आधुनिकविद्वांसः मदान्धा इव संभाषन्ते तदा न्यायदर्शनं प्रमाण लगुडहस्तं सत् निमित्तकारणसाध्यमेकत्व वच्छिन्नं समग्रज्ञानुसंधि करणंमीश्वरं जगतः निर्मातारं घटनिर्माणकर्तृत्वे कुलालवत् समुपस्थापयति । द्यावा भूमी जनयन् देव एकः, विश्वस्यकर्ता भुवनस्य गोप्ता' इत्यादीनि श्रुत्युक्त प्रमाणानि च प्रददाति । एतेन न्यायनयोक्तकारणेषु समवाय्यसमवायि-निमित्ताख्येषु त्रिषु ईश्वरस्य सत्ता निमित्तकारणत्वेन स्वीकृता अस्ति । निमित्तस्य च तत्र वस्तुसापेक्षत्वेन स्वीकरणीयत्वेऽपि ईश्वरस्य नित्य शुद्ध चिन्मय स्वरूपत्वात् जगन्निर्माणकर्तृत्वधर्मविशेषसत्त्वेऽपि गुणत्रय परिणामफलभोक्तृत्वं न सम्भवति, यत् साधारण जीवै रूपभुज्यते ।

कार्यकारणभाव सम्बन्धेनेदं जगत् व्याप्तमस्ति । अत एव समग्राणां वस्तूनां निजनिजकारणा दुत्पत्तित्वं संगच्छते द्रव्ये यदा दृश्यत्वयोग्यतायाः स्थिति र्जायते तदैव जन्म इति लक्षणं श्रीमद्भागवतेऽपि उक्तमस्ति (श्रीमद्भाग. ३।३१।)– "उत्पत्तिर्द्रव्यदर्शनम्" । इदमत्र विचारणीयं भवति यत् तत्तत् कालावच्छेदेन जायमानं यत् किञ्चित् कार्यं प्रति तदीय नियतावश्यकपूर्ववृत्ति कारणं भवति । एतेन कार्यं नवीनं कारणञ्च प्राचीनमिति मन्तव्यम् तथा च कारणं सत् कार्यमसत् इत्याकारकं ज्ञानं स्वतः समायातम् । प्रथम क्षणे प्राप्तमृत्तिकाचक्रदण्डादीनि वस्तूनि, कारणभूतानि द्वितीयक्षणे घट-नामकं कम्बुग्रीवादिमत्त्वावच्छिन्नं किमपि अपूर्वं वस्तु उत्पादयन्ति । प्रथम-क्षणे घटरूपकार्यस्य सत्ता एव नास्ति, द्वितीयक्षणे इन्द्रियगोचरीभूतस्य घट-रूपकार्यस्य प्रागभावप्रतियोगित्वात् असत्द्रूपता स्वतः समायाति ।

कार्यकारणभावसम्बन्धे पाश्चात्यदार्शनिक विदुषां मतमपि किञ्चित् वैचित्र्यमादधाति । जार्जवर्कले, डेभिड ह्युम महोदयौ कार्यकारणभाव-सम्बन्धं न स्वीकुरुतः, जान लाक महोदयोऽपि तावेवानुगच्छति । तद्यथा प्रथमक्षणे मृत्तिकाचक्रदण्डकुलालादीनां ज्ञानं जातम्, द्वितीयक्षणे च कम्बुग्रीवादिमत्त्वावच्छिन्नघटरूपस्य दर्शनं जातमिति आवश्यकक्लृप्त ज्ञानेनैवोपपत्तौ कार्यकारण भावसम्बन्धान्तरकल्पनं व्यर्थमिति तेषाम-भिप्रायः । न किमपि कस्यापि कारणं भवति, ज्ञानस्य समूहावलम्बने एकज्ञा-नानन्तरमपरं ज्ञानं समुत्पद्यते । ज्ञानाधिष्ठानरूपे आत्मनि ज्ञानानां तैलधा-रावदवच्छिन्नप्रवाहोऽस्ति, एतत् प्रकृति सिद्धमस्ति न केनापि निरोद्धुं शक्यते, प्रत्युतप्रकृति सञ्चालितमिदं सर्वदा सर्वैरेवात्मभिरनुभवितुं शक्यम् । यत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यत् पूर्ववर्तिज्ञानं तत्तदुत्तरवर्तिज्ञानं स्वतः सञ्जनयति, इत्यनेनैव जगद् व्यवहारोपपत्तौ कार्यकारणभावसम्बन्धं पृथक् कल्पयित्वा वस्तुविवेचनं गौरवं भवति, इति तेषां मतम् । वयन्तु कथयामोयत् तैरपि अनन्तज्ञानानां अनन्त कार्यकारणकल्पनापेक्षया समग्रबुद्ध्या एक एव कार्यकारणभावसंबन्धो व्यवस्थापनीयः, । एष एव श्रेयस्करः पन्था न्यायशास्त्रस्य , अत एवोक्तं "प्रदीपः सर्वशास्त्राणामाश्रयः सर्वकर्मणाम् ।" इति

ध्रुवा द्यौ ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगत् ध्रुवो राजा विशामयम् ॥

—ऋग्वेदः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

" श्राद्धविमर्शः "

डा. श्री भोजराजपन्तः

सरणशीलेऽस्मिन् संसारेसृष्टि कालादेव मानवस्य कृते विविधा देशिक-कालिक-दैनिकनियमोपनियमादीनां व्यवस्थाः प्रथमं सृष्टिकृता ततश्चानेकै ऋषिभिस्ततत्समये विहिताः, समयानुकूल्येन परिवर्तिताः परिवर्द्धिताश्च विद्यन्ते। व्यवस्थाश्चेमा नित्य-नैमित्तिक-काम्यकर्मरूपेण विज्ञायन्ते।पुनश्चेमा वर्णाश्रमभेदेन भिद्यन्ते, यतो हि-चातुर्वर्ण्यव्यवस्था–चतुराश्रमव्यवस्था च । चातुर्वर्ण्यव्यवस्थायां ब्राह्मण-क्षत्रिय-विड्शूद्राणां कृते पृथक्-पृथक् दैनिकी चर्या व्यवस्थापिता । एवमेव चतुराश्रमव्यवस्थायामपि-ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-सन्यासाश्रमाणां नियमोपनियमाः सुव्यवस्थापिताः शास्त्रकारैः ।

तत्रादौ सृस्टिकालः समायाति, ततो वैदिककालस्ततो ब्राह्मणकालस्तत उपनिषत्कालस्ततः स्मृतिकालस्ततः पौराणिककालस्ततो भारतकालश्चेति क्रमेणायातो दृश्यते, सर्वञ्चेदं संस्कृतग्रन्थावलोकनेन विज्ञायते । तत्र च काले-काले व्यवस्थायाःक्वचित् परिवर्तनं क्वचिच्च परिवर्द्धनमपि द्रष्टुं शक्यते किन्तु सूत्ररूपेण यानि यानि कर्माणि येषां येषां कृते व्यवस्थापितान्यासन् तानितानी–दानीमपि सन्त्येव,तेषुविधेः प्रयोगस्य च परिवर्तनं परिलक्ष्यते । वैदिकीयं परम्पराऽद्यापि वैदिककालादेव प्रचलन्ती भविष्यत्कालेऽपि प्रचलिष्यतीत्यत्र नास्ति शंकावसरः । तदेतेषु कर्मसु श्राद्धमपि , यच्चसर्वेषां कृते कृत्यं विधते "दद्यादहरहः श्राद्धम्" इत्यादिवचनात् ।

तदत्रादौ श्राद्धशब्दार्थः कः? इति जिज्ञासायामुच्यते–अत्रतावत्प्रथमं श्रद्धा-शब्द एव विचारणीयः। श्रद्धानं श्रद्धेति। श्रत् पूर्वकाद् धाधातोः"आतश्चोपसर्गे" इति[पा०सू००३।३।१०६] अङि, टापि च कृते "श्रद्धा" इति भवति । तदुक्तम्–"श्रद्धा श्रद्धानात्"(१.) इति । ततः श्रद्धया दीयते यत्तच्छ्राद्धमितिव्युत्पत्त्या "तस्येदम्(पा०सू०४।३।१२०)इत्यणि श्राद्धमिति । अथवा" श्रद्धाऽस्मिन्नस्तीति

१. द्रष्टव्यम्:- निरूक्त -९-३-३१, पृष्ठे ४२५ ।

महेन्द्र-संस्कृत-विश्वविद्यालयः, जनता विद्यापीठम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्राद्धम् " प्रज्ञाश्रद्धार्चाभ्यो णः ", यद्यपि पित्र्यं कर्म श्राद्धशब्देनोच्यते, तथा-पीह तत्साधनद्रव्यमुच्यते मुख्यस्य श्राद्धस्य भोक्तुमशक्यत्वात् (२) इति । अत एवोक्तमपि:–

"देशे काले च पात्रे च श्रद्धया विधिना च यत् ।
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम् ।" (३) इति ।

अन्यच्च– "प्रेतोद्देशेन पित्रुदेशेन वा द्रव्यत्यागः श्राद्धम्" (४) इति । आङ्गल-व्याख्यायामपि :– " A Ceremony performed in honour of the dead with prayer and Chanting Vedic texts .,, (५) इति ।

अत्रवेदभेदेऽपि पित्रुद्देशेन क्रियमाणं कर्म श्राद्धशब्दवाच्यमेव तथा-ह्युक्तम्–

"यजुषां पिण्डदानं तु बह्वृचानां द्विजार्चनम् ।
श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम् ।।" (६) इति ।

इत्थञ्चात्र मृतकानां कृते, तेषामुद्देशेन यद्दीयते यच्च कर्म क्रियते तदेव श्राद्ध-मिति स्पष्टम् । कर्म चेदं वैदिककालादेव प्रचलदस्ति, वैदिकञ्चेदं कर्म सविस्तरं शास्त्रेषु वर्णितं विद्यते ।

श्राद्धस्य नैके प्रकारा अपि वाहुल्येन वर्णिताः सन्ति । श्राद्धप्रकार-विषये वैविध्यं दृश्यते शास्त्रेषु । यतो हि– कैश्चिच्छ्राद्धस्य द्वैविध्यं, कैश्चित् त्रैविध्यं, कैश्चिच्चातुर्विध्यं, कैश्चित्पाञ्चविध्यं, कैश्चिदाष्टविध्यं, कैश्चिद् दौवादशविध्यं, कैश्चिच्च षाण्णवतिविध्यं स्वीक्रियते । श्राद्धानि चेमानि संक्षेपेणैवात्र प्रदर्श्यन्तेः ।

यद्यपि श्राद्धन्त्वेकमेव पित्रुद्देशेन दीयमानमन्नादिकं क्रियमाणं कर्म वा श्राद्धमेव तथापि प्रकारभेदास्तु प्रपञ्चार्थमेव । तद्यथा श्राद्धमेकमपि पार्वणैकोद्दिष्टभेदेन द्विविधमुक्तम्–

"एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितम् ।

२– द्र. सिद्धान्तकौमुद्याम् (तत्त्वबोधिन्याम्) पृष्ठ ३५६ ।
३– द्र. वीरमित्रोदये, श्राद्धप्रकाशे– पृ० ३ ।
४– द्र. स्मृतिमुक्ताफले, ४ खण्डे, श्राद्धकाण्डे– पृ० ७५७ ।
५– द्र. शब्दरत्नाकरे, इण्डेक्से– पृ० ७५७ ।
६– द्र. धर्मसिन्धौ, तृतीयपरिच्छेदे, पृ० २९८ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुः ।।"(७) इति ।

इदमेव नित्य–नैमित्तिक–काम्यभेदेन त्रैविध्यमपि यथा–

"श्राद्धद्वयं तथोद्दिष्टमेकोद्दिष्टं च पार्वणम् ।
नित्यं नैमित्तिकं-काम्यमिति तच्च पुनस्त्रिधा ।।"(८) इति ।

एवमेवास्य चातुर्विध्यमप्युक्तम्– "पार्वणैकोद्दिष्टवृद्धिसपिण्डीकरणात्मकं चतुर्विधमेव मुख्यम्"(९) इति ।

एवमेवास्य पाञ्चविध्यं यथा-

"नित्यंनैमित्तिकंकाम्यं–वृद्धिं–श्राद्धं तथैव च ।
पार्वणं चेति मनुना श्राद्धं पञ्चविधं स्मृतम् "।। (१०)इति

" दैविकं चाष्टमं श्राद्धं यत्कृत्वा मुच्यते भयात् " (११)इत्यन्तेनाष्टविध्यमप्युक्तम् । एवमस्यैव दौवादशविध्यन्तु– " तत्तु द्वादशविधम् " (१२) इत्यादिनोक्तम् । षाण्णवतिविध्यमस्यैवमुक्तम् :– " आमा १२ युग ४ मनु–१४ क्रान्ति १२ धृति १२ पात १२ महालय १५ अष्टका ५९ न्वष्टका ५ पूर्वेद्युः ५श्राद्धै नवतिश्च षट् इति । ज्ञेयानि(१३)इति। एवञ्चेमानि श्राद्धानि प्राचीनकाले सर्वे समाचरन्तिस्म ब्राह्मणाः किन्तु समयेऽस्मिन् न सर्वे समाचरन्ति, यद्यपि सर्वेषां कृते श्राद्धमनिवार्यत्वेन प्रतिपादितं शास्त्रकारैः शास्त्रेषु ।

श्राद्ध कर्मणो महत्त्वमपि न सामान्यम् , पुत्रस्य पुत्रत्वेऽपि श्राद्धमेव कारणम् । तदेवमुक्तम् :–

" जीवतोवाक्यकारणान्मृताहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिःपुत्रस्य पुत्रता ।।(१४)इति।

अतः श्राद्धस्य महत्त्वमपि प्रकृष्टम् । श्राद्धकर्ता स्वयमपि फलभाग् भवति पितृनप्युत्तारयति, तदुक्तम् –

७– द्र. स्मृतिमुक्ताफले– पृ० ७५७ ।

८– द्र. तत्रैव ।

९– द्र. धर्मसिन्धौ, पृ० २६६ ।

१०. द्र. श्राद्धविवेके , प्रथमपरिच्छेदे पृ० १

११ " कूर्मपुराणे २०।२५-२७।पृ०११८-१९ ।

१२ " शब्दकल्पद्रुमे , ५ भागे , पृ० १५५ ।

१३. " धर्मसिन्धौ, पूर्वार्द्धे ' २ परिच्छेदे - पृ० ६१ ।

१४. " और्ध्वदेहिककर्मपद्धतौ - भूमिकायाम्- पृ० ५ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

" प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा ।
नृणांश्राद्धे सदा प्रींताः प्रयच्छन्ति पितामहाः ।। "(१५)इति ।

अन्यश्च -

श्राद्धात्परतरं नान्यच्छ्रेयस्करमुदाहृतम् ।
तस्मात्सर्व प्रयत्नेन श्राद्धं कुर्याद्विचक्षणः ।।(१६) इति ।

एवञ्च " श्राद्धं श्राद्धान्वितः कुर्वन् तर्पयत्यखिलं हि तत् ,,वाक्येनानेन श्राद्धस्य स्थानं महत्त्वञ्च सर्वोपरि सर्वोत्कृष्टञ्च विद्यते ।

श्राद्धञ्चेदं मृतश्राद्धमेवेति हिन्दुसमाजे प्राचीनकालादेवाद्यतनकाल-पर्यन्तं क्रियमाणं विद्यते । यद्यपि केचिद् वैदिकमार्यञ्चात्मानं मन्यमाना आर्यसामाजिकाः श्राद्धस्याव्याख्यानं कुर्वन्तो जीवच्छ्राद्धं शिक्षयन्त्याचरन्ति च । मृतश्राद्धन्तु कपोलकल्पितमिति कथयन्ति , तदेतत्सर्वं निर्मूलगहङ्काराका-रितमवैदिकञ्च व्याख्यानम् । श्राद्धं वैदिककालेऽपि मृतकेभ्यो दीयतेस्मेति ऋग्वेदे , ब्राह्मणग्रन्थेषु चोप लभ्यते, अत एवास्य प्राचीनत्वं वैदिकत्वञ्च सिद्धयति । तदुक्तम् " श्राद्धे ब्राह्मणभोजनादिकमपि न पश्चात्कालिकी धारणा किन्तु प्राचीनो विधिः " (१७.) इति ।

हिन्दुसमाजे मरणकालादेव श्राद्धप्रक्रिया प्रारभ्यते। यद्यपीदंकर्म अन्त्येष्टि-संस्कारनाम्ना प्रसिद्धिमागतं हिन्दुसमाजे तथापि तदपि श्राद्धपरमेवेति वक्तुं शक्यते। इदञ्च प्रायेणाश्वलायनगृह्यसूत्रानुसारेणैव क्रियते । यद्यपीदानीमपि ये चाहिता-ग्नयो भवन्ति तेषामन्त्येष्टि क्रिया तु वैदिकरीत्यैव समायोज्यमाना दृश्यते, ये चात्र साधारणा गृहस्थास्तेषां तु स्व-स्वगृह्यसूत्रानुसारेणैव गरूडपुराणानुसारेणैव–वाऽन्त्येष्टिः क्रियते । मृतकस्य दाहादि संस्कारा एवान्त्येष्टिशब्देन ज्ञायन्ते । दाहसंस्कार एव हिन्दुसमाजे वैदिककालादेव प्रचलित अद्यावधि प्रचलति ।

विदेशेषु यवनाःक्रिश्चियनाश्च दाहसंस्कारं मृतकस्य न कुर्वन्ति किन्तु भूमौ खात विधाय शवं तत्र स्थापयन्ति , संस्थाप्य च प्रपूरयन्ति खातम् । किन्तु पारसिका ये चाग्न्युपासकास्तेषां धर्मग्रन्थेषु खातेषु शवस्थापनं महानपराधः । एवमेव प्राचीनकाले रोमदेशीयाः क्रिश्चियना अपि शवदाहमेवाचरन्तिस्म । ये चात्महन्तारो हिंसका दुश्चरित्रास्तेषां कृते खातेषु शवस्थापनव्यवस्थाऽऽसीत्

१५.द्र. श्राद्धमयूखे- पृ० २१ ।
१६. " स्मृतिमुक्ताफले- पृ० ८२२
१७. " धर्मशास्त्र काइतिहासे, ३ भागे, पृ० ११५६ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिन्दुधर्मशास्त्रेऽपि पतितानां कृते दाहादिसंस्कारस्यावश्यकता न दर्शिता । तथा चोक्तम्--

"प्रतितानां न दाहः स्यान्न च स्यादस्थिसंचयः ।
नचाश्रुपातः पिण्डो वा कार्या श्राद्धक्रिया न च ।।" (१८) इति ।

उदारभावनया प्रेरिता हिन्दवो वैदिककालादेव श्राद्धादिकर्मसु स्वीयमौदार्य प्रदर्शयन्त इदानीमपि भावनामिमामक्षुण्णां वर्तयन्ति । नास्त्यत्र वैयक्तिकं स्वार्थ "सर्वं खल्विदं ब्रह्म" इत्यादि वाक्यानामपि आविर्भावो भावनयाऽनयैवाभूदित्यत्र नास्ति सन्देहावसरः । श्राद्धे कर्मणि तु भावनेयं सर्वोपरि विद्यते । तदुक्तम्–

"आब्रह्मस्तम्बपर्यन्तं देवर्षि पितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।।
ये बान्धवाबान्धवा वा येऽन्य जन्मनि बान्धवाः ।
तेषां पिण्डोमया दत्तो ह्यक्षय्यमुपतिष्ठताम् ।।" (१९) इति ।

न ह्येतादृशी भावना ऽन्यधर्मेषु-धर्मग्रन्थेषु वोपलभ्यते । इदमेव हिन्दूनां वैशिष्टयम् ।

हिन्दवो ब्राहुल्येन नेपालभारतादिदेशेषु निवसन्ति, मुख्यतया नेपालभारतयोरेव ।

नेपाले प्राचीनकालादेव सृष्टिकालादेव वा निवसन्तो हिन्दवः संस्काराणां विधिमनुसरन्ति । परम्परेयं वैदिककालादद्यावधि यथाविधि-यथानियमञ्च प्रचाल्यमाना विद्यते ।सर्वत्रैव परिवर्तने परिवर्द्धनञ्च कालाधीनमेव । एवमेवात्रापि परिस्थित्यनुसारेण लोकहितायैव संस्कारविधिप्रयोगेषु परिवर्तनं परिवर्द्धनञ्च मन्त्रद्रष्टृभिर्ऋषिभिः क्रियते, इदञ्च सर्वं युगानुकूल्येनैव कृतं विद्यते , परिवर्तनं - परिवर्द्धनञ्च वैज्ञानिकमपीति तत्तच्छास्त्रालोडनेन समयपरिज्ञानेन च स्पष्टी भवति । यतो हि वैदिककाले पितृभ्यः श्राद्धे मांसमपि दीयतेस्म किन्तु स्मृतिकाले तन्निषिद्धम् । यथा हि:-

"यज्ञाधानं गवालम्भं सन्यासं पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्चविवर्जयेत् ।।" (२०) इति ।

नेपाले ऽपीदं कर्म स्व स्वकुलाचारानुसारेण ब्राह्मण--

१८. द्र. तत्रैव, पृ० ११३२।

१९ द्र- नारदीयमहापुराणे, उत्तरखण्डे, ४५/५३–७०. / पृ० ३०० ।

२० . द्र०- वाजसनेयिनां श्राद्धपद्धतौ–पृ० १० ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षत्रिय-विड्शूद्राः समाचरन्त्येव,किन्त्वत्रेयान् विशेषो यद् ब्रह्मणाः सुष्टुप्रकारेण यथाविधि समभिहारेण चाचरन्ति चेत् क्षत्रिय-वैश्यजातीयाः किञ्चित् संक्षेपेण। शूद्रास्तु स्व स्वकुलपरम्परामनुसृत्याचरन्ति । इदन्तु निश्चप्रचं यन्नेपाले ब्राह्मण-क्षत्रिय वैश्य शूद्रै र्यथाविधि प्राक्कालादेव यथावत् श्राद्धं कर्म क्रियते ।

नेपाले विविधा जातयः सन्ति, यद्यप्यत्र बाहुल्येनार्या एव निवसन्ति किन्तु सन्त्यनार्या अपि । यथा च ते राई-लिम्बू- तामाङ-मगर- नेवार- लामा-थारूजातीया अनार्याः किन्त्वेतेष्वपि श्राद्धपरम्परा प्रकारान्तरेण दरीदृश्यते ।

नेपाले श्राद्धप्रयोगे कश्चिद् भेदोऽपि दृश्यते, स चात्र स्व-स्व कुलाचारानुसारेणैव । यथा हि नेपाले ब्राह्मणेषु केचन कौर्माचलाः केचन पूर्वीयाः केचन मैथिलाश्च सन्ति । एतेषु श्राद्धकर्मप्रयोगेषु भेदो दृश्यते, स तु स्थान-भेदेन कुलाचारभेदेन च, विधिस्तु प्रायेण समान एव । यतो हि नेपालीयाः कौर्माचला ब्राह्मण-क्षत्रिय-वैश्याः श्राद्धे पक्वमन्नमादौ विष्णवे नैवेद्यं परि-वेष्य निवेद्य च विश्वेदेवब्राह्मण समीपे पितृमातामहब्राह्मण समीपे च पात्रेषु सुशीतलजल सहितोष्णपक्वान्नपरिवेषणं कुर्वन्ति, किन्तु पूर्वीयास्त्वत्रावसरे कुर्वन्त्यामान्नपरिवेषणम् । केचन पूर्वीया ब्राह्मण-क्षत्रिय-वैश्या जीवितायां मातरि मृते च पितरि मातृपक्षीयेभ्यः पितृभ्यः [पितामही-प्रपितामहीभ्यश्च] तर्पणपिण्डदानादिकं न कुर्वन्ति, प्रायेणेमे ब्राह्मण-क्षत्रिय-वैश्या रापत्यश्व-लीयाः सन्ति । मैथिलाश्च महालया-श्राद्धे यवचूर्णपिण्डैः पिण्डदानं कुर्वन्ति, एकोद्दिष्टे च भक्तादि पक्वान्नेन पिण्डदानं कुर्वन्ति । तत्र च पिण्डदानावसरे पिण्डवेदिकालेपनानन्तरं रेखाकरणं क्रियते । तत उल्मुकधारिणक्रियां न कुर्वन्ति, इमे च सामवेदिन एव । नेपाले प्रायेण ब्राह्मणा यजुर्वेदाध्यायिनः किन्तु मैथिलेषु सन्ति स्वल्पाश्छन्दोगाः । श्राद्धे कर्मणि यजुर्वेदिनां-छन्दोगानां चास्ति भेदः स च मन्त्रेषु वर्तते । समानेऽपि मन्त्रे वेदभेदेनोच्चारणभेदः । सत्यपि भेदे नेपालदेशीयाः सर्वेऽपि श्राद्धं कर्म कुर्वन्त्येवेति निश्चप्रचम् ।

इत्थश्चात्र श्राद्धशब्दार्थः श्राद्धप्रकारास्तस्य महत्त्वं, हिन्दुसमाजे श्राद्धीया भावना, नेपालीयेषु श्राद्धीयाः परम्पराश्चेत्यादयो विषया अत्र प्रदर्शिताः संक्षेपेण ।

श्राद्धस्य विदेशेष्वन्यधर्मेषु च प्रकारान्तरेण स्थितिः, श्राद्धस्य वैज्ञा-निकत्वम् , श्राद्धस्यावश्यकता, मृतकस्य श्राद्धकर्मणा सह सम्बन्धः, प्रत्य-क्षलौकिकप्रमाणैः श्राद्धपक्षस्थापनम् , गारुडीयकथाया अकालपनिकत्वमि-त्यादयो विषयाः पुनरग्रामाङ्के प्रदर्शयिष्यन्त इतिशम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थान्यादेशयोर्वाचकत्व-विमर्शः ।

विष्णुप्रसाद शर्मा देवकोटा[*]

अद्यत्वे पाणिनीयमेव व्याकरणम् अन्येषु संस्कृत-व्याकरणेषु शेखरायमाणम् अध्ययनाध्यापनेषु व्यवह्रियमाणाञ्चास्ति । अस्यसर्वातिशायित्वञ्च सर्वाङ्गीणत्वात्, परिष्कृतत्वात्, व्यापकत्वात्, अल्पाक्षरत्वात्, सारवत्त्वात्, लौकिकवैदिकोभयविधत्वाच्च । व्याकरणेनचानेन शब्देषु स्वरसंस्कारौ क्रियेते । तत्र च स्वरश्चोदात्तादिः, संस्कारश्च प्रकृतिप्रत्ययाभ्याम् शब्दव्युत्पादनम् । स्वरसंस्कारादिवेलायाम् स्थान्यादेशभावोऽङ्गीकृतः पाणिनिनापि । व्याकरणेऽपिशब्दानां नित्यत्वमङ्गीक्रियते । अतएव तत्तदवयवबोधनेन तत्तत्समुदायबोधनार्थं तत्तदवयवार्थबोधनेनचतत्तत्समुदायार्थबोधनार्थं स्थान्यादेशभावउपयुज्यते, व्यवहारेवाक्यस्यैवार्थबोधकत्वात् (१) । तत्रकिं नामस्थानित्वम् किञ्चादेशत्वमितिप्रतिपाद्यं पूर्वम् । तत्रस्थानशब्दादिनि प्रत्यये स्थानिशब्दः सिद्ध्यति । स्थानिशब्दघटकः स्थानशब्दश्च स्थीयतेऽत्रइति, तिष्ठन्ति अस्मिन्निति वा विग्रहे स्थितिरिति विग्रहे च अधिकरणे [३ । ३ । ११७] भावे [३।३।११५] च ल्युटि सिद्ध्यति । तस्य च चत्वारोऽर्थाः अर्थः प्रसङ्गः ज्ञानम् अभावो निवृत्तिर्वा तत्र स्थानमर्थः इति केचिदाहुः—तिष्ठन्ति अस्मिन् शब्दा इति विग्रहात् अर्थे च वाचकत्व सम्बन्धेन शब्दास्तिष्ठन्ति । तेन "अस्तेर्भूः" (२।४।५२) इत्यत्र "षष्ठी स्थानेयोगा (१।१।४९) इति परिभाषया स्थाननिमित्तः सम्बन्धो ऽवसीयते इति अस्तेरर्थे भूरिति तदर्थः । भ्रस्जोरोपधयोरमन्यतरस्याम् (६। ४।४७) इत्यादौ च 'षष्ठी स्थानेयोगा" इत्यस्योपस्थितत्वेन रोपधादीनामानर्थस्यात्भावसाधनः प्रसङ्गवाची स्थानशब्दोऽस्तीति ज्ञायते । प्रसङ्गश्च

१ वैयाकरण–सिद्धान्त-लघु- मञ्जुषाया प्रारम्भे

२-पा. सू. १।१।४९इत्यत्र प्रदीपः । ३

[*]उप. प्रध्यापकः, जनताविद्यापीठस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदेशानाम् । तेन ' अस्तेर्भूरित्यादौ अस्तेः प्रसङ्गे ऽस्तेः प्राप्तौ भूः प्रयुज्यते इत्यर्थो भवति । आर्धधातुके प्रत्ययेऽस्तेरप्रयोगः स्वाभाविकः भूशब्दस्य च प्रयोगः स्वाभाविकः इत्यनेन प्रकारेणान्वाख्यायते शतदुक्तम् कौमुद्यां शेखरे च– "स्थानञ्च प्रसङ्गः" इति । न च स्थानशब्दस्य प्रसङ्गार्थत्वे विवादः । "दर्भाणां स्थाने शरैः प्रस्तरितव्यम्" इत्यादावपि प्रसङ्गे इत्यर्थप्रतीतेः । अत एव च अनेन महामूर्खेण यणः स्थाने इक् प्रयुक्तः, शराणां स्थाने दर्भाः प्रस्तारिता' इति व्यवहारः । "अर्थवत्येव स्थान्यादेशभावः" इति नियमात् प्रसङ्गश्च सति सम्भवेऽर्थवत एव, अर्थप्रत्यायनार्थं शब्दप्रयोगात् "इको यणचीत्यादेरच्परेकारघटितशब्दस्यार्थबोधनाय प्रसङ्गे तत्परयकार घटितः प्रयोक्तव्यः इत्यर्थः ।

केचन तु "प्रसक्तिरनुमितिरापत्तिर्वा" इति गदाधरोक्त्या प्रसङ्गपदार्थस्य ज्ञानरूपत्वात् स एवात्र स्थानपदार्थः । तथा च इकोयणचीत्यादौ अजव्यवहितपूर्वेग्विशेष्यकसाधुत्वप्रकारके, सामान्यशास्त्रकरणके ज्ञाने सति यण साधुभवतीति वाक्यार्थ इति (१) वदन्ति । अन्येतु अभाव एव, निवृत्तिरेव वा स्थानपदार्थ इत्याहुः । स्थीतयेऽत्र आदेशेनेति विग्रहे निष्पन्नस्य स्थानशब्दस्य निवृत्तिरभावो वाप्यर्थः । प्रतियोगितयाऽभावान्वयप्रयोज्यत्वं षष्ठ्यर्थः । अभावस्य च लिङर्थेष्टसाधनत्वेऽन्वयः । तथा च "इको यणचि" (६।१।७७) इत्यादौ इक्प्रयोज्यत्वाभाववदिष्टसाधनत्ववान् यण् इति बोधः इति च । तन्न, व्याकरणे शब्दानां नित्यत्वाङ्गीकारेण तथा सति तदभङ्गापत्तेः । अतोऽर्थः प्रसङ्गोज्ञानं वा स्थानशब्दार्थ इति । एवञ्चास्मादेव स्थानशब्दात् अस्त्यर्थे इनि स्थानिन्शब्दो निष्पद्यते । स च स्थानिशब्दः व्याकरणोक्ते आदिश्यमानस्य यणादेः कारणे इगादौ वर्त्तते (२) तद्विषयेतापर्याप्त्यधिकरणत्वम्, आपत्तिविषयबुद्धिविषयतापर्याप्त्यधिकरणत्वम्वा स्थानित्वम् (३) । आदेशश्च रूपान्तरापत्तिः, इको यणचीत्यादौ इगादिषु जायमाना यणादय आदेशाः । अत एवोक्तं केनापि–

आदेश उपघाती यः प्रकृतेः प्रत्ययस्य वा । इति अतएव च मित्रवदागमाश्शत्रुवच्चादेशा इति प्रक्रियालापनप्रसङ्गे प्रसिद्धिः । स्थान्या-

१– षष्ठी स्थानेयोगा इत्यत्र दीपकः ।

२– वाचस्पत्यम् कोषः ।

३– षष्ठी स्थानेयोगा इत्यत्र सदाशिवभट्टीयम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशभावश्चधातुप्रातिपदिकविभक्ति प्रत्ययादिषु सर्वत्र दृश्यते । स तु बुद्धिविप - रिणामेन सुधी+उपास्य इति प्रयोगे प्राप्ते सुद्ध्युपास्य इति प्रयोगः कर्त्तव्य इतिरीत्येतितु अन्यदेतत्–

पाणिनि-मते पदानि सामान्यतो द्विविधानिसुवन्तानि, तिङन्तानि च " सुप्तिङन्तं पदमिति सूत्रात् । सुवन्तेषु रामान् रामैरित्यादिषु विसर्गनकारादिषु कर्मकरणादिवाचकत्वम्, उच्चरित एव शब्दः प्रत्यायकः नानुच्चारित" इति अणु-दित्सूत्रभाष्यात् यो यदर्थाभिधानसमर्थः सतस्यादेशः ' इति न्यायाल्लोके तथैवा-नुभवाच्च । लाघवेन प्रक्रियानिर्वाहाय वोधकतारूपां नकारविसर्गादिनिष्ठां शक्ति तत्स्थानिघटितसमुदाये आरोप्य कर्मकरणादौ शस्भिसादयो विधीयन्तेन(१) । एवञ्च मूलतो वाचकतास्थानिनि व्याबहारिक्येवनतु आदेशे इति । स्थानिनि अर्थकल्पनायां लाघवेन प्रक्रियानिर्वाहश्च शस्भिसादेरादेशानां , तदादेशानाञ्च अर्थकल्पनाया अभावात् । तिङन्तस्थले च बभूव इत्यत्र तिपस्तदादेशस्य णल श्चार्थोऽवक्तव्यो भवति लुटि च डारौरसादेरर्थोऽवक्तव्यो भवति । आदेशानामेव वोधकत्वस्वीकारे तु सर्वेषामादेशानामर्थो वक्तव्यो भविष्यति इति गौरवम् स्पष्टम् ।

तिङन्तेषु चादेशानां तिङादीनां बोधकत्वम् "लः कर्मणि च भावे चाकर्म–केभ्यः " इति सूत्रन्तु वोधकतारूपां तिबादिशक्ति तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराणां कर्मणिकर्त्तरि च विधायकम् । व्यवहारे तिङाद्यादेशानांमेव वोधकत्वमित्यस्यायमाशयः-यथा एकार्थोपस्थापकत्वरूपस्यैर्थीकाभावो राजपुरूषादि समस्तपदेष्वेव, समुदायशक्त्या तत एव तदर्थस्य स्मरणादिति कृतसमासपदगत-मेकार्थीभावंतदर्थकालौकिकविग्रहवाक्ये समासात्पूर्वमारोप्य समासो भवति,एवमेव प्रकृते तिङन्तादिष्वपि तिबाद्यादेशगतां कर्त्रादिबोधकताशक्ति तत्स्थानित्वेन कल्पितेषु आरोप्य लः कर्मणीत्यादि सूत्रप्रवृत्तिर्भवतीतितद्वत् इति । आदेशानां वाचकत्वम् वर्णस्फोटबादि वैयाकरणमते । तत्र वर्णस्फोटपक्षेश्रूयमाणवर्णानामेव वाचकताया व्यवस्थापितत्वात् ।

नैयायिकास्तु वर्णस्फोटमनङ्गीकुर्वन्तः प्रयोगसमवायिनाम् तिब्विसर्गादीनां न वाचकत्वम् किन्तु स्थानिनामेव लकारसुबादीनां इत्य-ङ्गीकुर्वन्ति । आदेशानां तिब्विसर्गादीनामनेकत्वेन शक्त्यानन्त्यम् वह्वीषु आनुपूर्वीषु शक्ततावच्छेदकत्वस्यापि कल्पनीयत्वमिति च गौरवं तत्पक्षे । अथ

१- नन्वनयोराख्यातार्थत्वे किं मानमित्यादिमूलस्य भूषणसारस्य शाङ्करी ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चादेशानां वाचकत्वे च एधाञ्चक्रे इत्यत्र 'आम' इति लिटो लुक्त्वेन ब्रह्म, वारि इत्यत्र सुपः, अपाचीत्यत्र तशब्दस्य च तत्त्वेन लुगादेरभावरूपस्य बोधकत्वा सम्भवः। किञ्चादेशानां वाचकत्वे तेषां परस्परं भिन्नतया व्यभिचारः—भवति, भवत इत्युभयत्रापि कर्त्राद्यर्थज्ञानसत्त्वेऽपि भवतीत्यत्र कर्त्रर्थज्ञानकारणीभूतत-सादेशज्ञानं नास्ति, भवत इत्यत्र च तादृशज्ञानकारणीभूततिवादेशज्ञानं नास्तीति कार्यसत्त्वेऽपि कारणाभावाद् व्यतिरेकव्यभिचारः। स्थानिनां वाचकत्वे तु न व्यभिचारः। लत्वस्य जातिरूपतया शक्ततावच्छेदकौचित्येन लाघवमपि। 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रानुगुण्यादपि लकारा-देरेव कर्त्रादिबोधकत्वम् युक्तम् इति।

वैयाकरणास्तु उपर्युक्तान् आदेशानां वाचकत्वाभावसाधकहेतून् निरस्यन्तस्तेषामेव व्यवहारे बोधकत्वमभ्युपगच्छन्ति१ — (१) व्यवस्थानु-रोधात् प्रयोगान्तर्गतास्तिप्विसर्गादय एव वाचका न तु तत्स्मृताः लकारसु-बादयः। व्यवस्था चात्र बोधानापत्तिरूपा। तथा च भवतीत्यादौ लकारमवि-दुषोऽवैयाकरणस्यापि कर्त्रादिबोधान्न तस्य वाचकत्वं युक्तम्। लकारादिज्ञाना-भाववतामपि कर्त्रादिबोधात् कारणाभावे कार्यसत्त्वरूपव्यतिरेकव्यभिचारस्य जागरूकत्वात्। (२) स्थानिभूतलकारादिज्ञानविधुराणां बोधआदेशेषु शक्ति-भ्रमादित्यपि न, तस्य भ्रमत्वे प्रमाणाभावात्। यत्र विषयस्यबाधस्तत्रैव भ्रमत्वम्। यथा-शुक्तौ रजतत्वस्य बाधात् रजतत्वज्ञानस्य भ्रमत्वम्, तथा प्रकृते वाचकत्वस्याबाधात् तज्ज्ञानस्य भ्रमत्वाभावः।

(३) स्थानिनोऽपि तत्तद्वैयाकरणैः पाणिनि–कालाप–शाकटयना-पिशलिप्रभृतिभिः स्वेच्छया सु-सि-रु-लट-कट–खडादीनाम् भिन्नानामभ्युपगमेन सर्वेषां शक्तत्वे गौरवम्, व्यभिचारश्चास्त्येव। रामः पचतीत्यादौ एकत्वाद्यर्थानाम् कर्त्राद्यर्थानाञ्चसर्वानुभवसिद्धम्। तादृशानुभवस्य निर्वाहाय एकत्वकर्त्राद्यर्थज्ञानंप्रति स्वादिसर्वस्थानिज्ञानं कारणमित्येवं कार्यकारणभावो वाच्यः। तत्र रामः भवति इत्यत्र पाणिनिमते स्थानिभूतसुलडादिज्ञानसत्त्वे ऽपि सि-कडादि ज्ञानं नास्ति।

१– तदुक्तम् दीक्षितेन– साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः।
व्यवस्थितेर्व्यवहृतेस्तद्ध तुन्यायतस्तया॥
किञ्चाख्यातेन शमायै लंडेवस्मार्यतेयदि।
कथं कर्त्तुरवाच्यत्ववाच्यत्वेतद्विभावय॥इति।६०।६१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा वैयाकरणान्तरमते सिप्रत्ययकर्तृलकारज्ञानसत्त्वेऽपि सुप्रत्ययलडादिज्ञानं नास्ति, एकत्व-कर्त्राद्यर्थज्ञानन्तूभयत्र मतेऽप्यस्तीति एकैकाभावेसत्यपरेणैकत्वाद्यर्थवोधननात् कारणाभावेऽपि कार्यसत्त्वरूपव्यतिरेकव्यभिचारः स्पष्टः। अथ चादेशानां वाचकत्वे आदेशिस्मरणकल्पनापि नेतिलाघवञ्चात्र पक्षे।

(४) शक्तिग्राहकेषु मुख्येन व्यवहारेणापि आदेशा एव वाचकाः वाचकत्वव्यवहारस्य श्रूयमाणतिङादिष्वेव सत्त्वात्। व्यवहारश्च आप्तानां गुर्वादीनांतत्तदर्थंवोधयितुं तत्तच्छब्दप्रयोगकरणरूपः। यथा—कम्बुग्रीवादिमन्तमर्थं वोधयितुम् घटमानयेति वाक्ये घटपदं प्रयुज्यते वृद्धैः। व्यवहारस्य शक्तिग्राहकेषु मुख्यत्वञ्च शक्तिग्रहे जननीये शक्तिग्रहान्तरनिरपेक्षत्वरूपम् व्याकरणादीनान्तु न तादृशमुख्यत्वमू। तस्यापत्यमित्यादिनाऽणादिप्रत्ययस्य शक्तिग्रहै जननीयेऽपत्यादि शब्दशक्तिग्रहस्यापेक्षितत्वात्, तस्यापि चेच्छब्दात्तरेण तस्य च शब्दान्तरेणेति अनवस्थाप्रसङ्गात् १।

(५) तद्धेतुन्यायतश्च तिङः व्यावहारिकी वाचकता। तद्धेतोरेव तदस्तु किं तेनेति न्यायस्वरूपम्। लाघवमूलकश्चायं न्यायः। तस्य हेतुस्तद्धेतुस्तस्य तद्धेतोरिति। तस्य=कपालादेः हेतो=मृदादेरेव तत् घटादिकारणत्वमस्तु किं तेनान्तर्गडुना कपालादिरूपकार्येण इति न्यायार्थः। घटस्य कपालादेर्मृदश्च कारणत्वकल्पने गौरवम्, उभयत्रकारणकल्पनासत्त्वात्, किन्तु कपालस्य घटस्य च मृदेव कारणमिति कल्पने लाघवम्। एवञ्च कर्त्राद्यर्थबोधने तिङो व्यावहारिककारणत्वम् लकारे तु आरोपितं वोधकत्वम्। आरोपितमपितत् तिङाद्यादेशेषु सङ्क्रान्तं भवतीति तेषां बोधकत्वम्।

अथ च लकारस्यैव व्यावहारिकबोधकत्वे भू+ल इति अलौकिकप्रक्रियावाक्यतोऽपि सत्ताकर्त्तृकबोधापत्तिः। एककर्त्तृकवर्त्तमानकालिकसत्तानुकूलो व्यापार इत्येतादृशे वोधे भव्+अतीति समभिव्याहारोऽपि कारणमिति चेत् तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वम्। लकारस्य वाचकत्वम् समभिव्याहारस्य कारणत्वमिति स्वीकारे तद्धेतु न्यायविरोधः स्यात्।

(६) किञ्च तिङत्वेन भावनायाम्, शानजादिना कर्त्तरि शक्तिरित्युपपत्तये आदेशानां वाचकत्वं स्वीकार्यम्, लकारस्यैव स्थानिनो वाचकत्वे तु कृत्तिङोः कर्त्तृभावनावाचकत्वव्यवस्था मीमांसकप्राचीनन्यायसिद्धान्तसिद्धा न स्यात्। मीमांसकैः प्राचीननैयायिकैश्च वक्ता इत्यादौ कृत्प्रत्ययस्य कर्त्तृवा-

१– वैयाकरणभूषणसारस्य शाङ्कर्याम् बोधकतारूपां तिवादिशक्तिमित्यत्र।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चकत्वम्, पचतीत्यादौ तिङन्ते च तिङो भावनावाचकत्वम् इति सिद्धान्तितम्। लकारस्य वाचकत्वेतूभयत्र स्थानिन एकत्वात् कर्तृभावनारूपार्थद्वयस्य वाच्यत्वन्नस्यात् इति सिद्धान्तभङ्गः स्यात् । नव्यनैयायिकानां वैयाकरणानाञ्च मते तु नायं विरोधः, सिद्धप्रयोगघटकतिवादीनामेव वास्तविकवाचकत्वाङ्गीकारेण तिङत्वेन भावनायाः शानजादिना कर्तुश्च बोधस्य सिद्धत्वात् । लकारस्य व्यावहारिकवाचकत्वाभावे यद्यपि 'लः कर्मणि चेति सूत्राणां सामान्यतो नानुगुण्यम् प्रतिभाति, तथापि आदेशनिष्ठामर्थबोधकतां लाघवेन प्रक्रियानिर्वाहाय स्वीकृते लकारे आरोप्य कर्त्तरि, कर्मणि , भावे च लकारा विधीयन्ते इति आनुगुण्यमेव ।

ननु तिबाद्यादेशानामेव वास्तविकवाचकत्वे तत एव कर्त्राद्यर्थबोधस्य सिद्धत्वाल्लकारस्यानावश्यकत्वाल्लस्येत्यनुक्त्वा 'तिप्तसित्यादिना स्वातन्त्र्येण तिबादयो विधीयन्ताम् न लकाराः । 'वर्त्तमाने तिङ'(१) (३।२।१२३) 'तिङः शतृशानचावप्रथमासमानाधिकरणे' (३।२।१२४) इत्येवं रीत्या लट्पदस्थाने तिङ्पदमुपन्यस्य तद्घटितसूत्राणि कृत्वा वर्त्तमानादिकालाश्च विधीयन्तामिति चेन्न, आत्मनेपदानां टेरे' (३।४।७९) इत्यादीनामसाङ्गत्यापत्तेः टितो लकारस्यैवाभावात् । न च वर्त्तमाने तिङट' ' अनद्यतने तिङट ' इत्यादिन्यासान्विधाय तत्तत्कालार्थकतिवादिषु अनुवन्ध आसज्यताम् इति वाच्यम् ? " लिटस्तझयोरेशिरेच् " [३ ४ । ८१] " लुटःप्रथमस्य डारौरसः " [२ । ४ । ८५] इत्यान्दावसाङ्गत्यापत्तेः तादवस्थ्यात्। तत्र तत्रापि न्यासान्तररचने च गौरवापत्तिः स्पष्टैव। एवञ्च सुप्तिबाद्यादेशेष्वेव व्यवहारोपयोगिनी बोधकताशक्तिः, लकारेषु तु आरोपिता, एकार्थीभावस्य वस्तुतो राजपुरुषादिसमस्तपदेष्वेव सत्त्वेऽपि अलौकिकप्रक्रियावगम्ये तस्यारोपितत्यवत् । प्राक्रियासौविध्यार्थं कर्त्राद्यर्थबोधकता शक्तिर्लकारेषु कल्पिता , स्थानिवद्भावेन तिङादिषु पुनः सङ्क्रान्ता भवतीति च आदेशानां वाचकत्वं वैयाम्करणाभिमतम्(२)। लकारेषु कल्पिताया अपि वोधकताशक्तेः सत्वादेव तिङांसर्वत्रैकरूप्येऽपि स्थानिलकारभेदेनैव भूतभविष्यद्वर्त्तमानकालानाम् विध्याद्यर्थानाञ्च भेदेन प्रतीत्या लकारार्थत्वेन एषां

१– वैयाकरण-भूषणसारस्य शाङ्करी, नन्वनयोराख्यातार्थत्वे किं मानमित्यत्र ।

२-वैयाकरणभूषणसारेधात्वर्थनिर्णये वोधकतारूपां तिबादि शक्तिमित्यादिपङक्तौ भैमी भाष्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवहारः (१)। अत एवदीक्षितेन सिद्धान्तकौमुद्यां, रामचन्द्राचार्येण च प्रक्रियाकौमुद्यां 'लकारार्थप्रक्रिया' इति अन्यतमं प्रकरणम् प्रकृतम्। भूषणसारादौ च 'लकारार्थनिर्णयः' इत्याद्यु दलेखिकौण्डभट्टादिना। तिङाद्यादेशानामेव वाचकत्वमिति स्वीकृतौ तु तदसङ्गतिः स्पष्टैव।

एवञ्च लाघवेन प्रक्रियानिर्वाहार्थं स्थानिषुकल्पितंवोधकत्वम्। स्थान्यादेशभावे स्थानिप्रयुक्तमादेशानां वाचकत्वम्। अन्यथा भूतभविष्यदाद्यर्थावोधापत्तिः। स्थान्यादेशभावः तत्र स्थानिनामपि बोधकत्वमिति च नेपालीहिन्द्यादिलौकिकभाषावैयाकरणानां, तद्भाषाभाषिणाञ्च कृते आवश्यकम्। अस्माकं राष्ट्रभाषायां नेपाल्यां, हिद्याञ्च अनोके पारिभाषिकाः शब्दाः सन्ति। एतच्च पारिभाषिकशब्दानां सत्त्वम् नेपालीभाषाया वैशिष्ट्यम्। नेपाल्यां हि समीभवन-विपर्यास-नासिकिभवन- स्वरभक्ति- मध्यस्वरलोपा दिस्वरलोपान्त्यवर्णलोपादिभिः शब्दाःसन्ति निष्पन्नाः। तेषामर्थवोधार्थमुदाहरणानां ज्ञानार्थञ्च संस्कृतव्याकरणस्य स्थान्यादेशभावः स्थानिनामर्थवोधकत्वञ्च अवश्यमध्येयम्। उक्तेषु च पारिभाषिकेषु शब्देषु समीभनं त्रिप्रकारकम[२]। क—प्रगत- समीभवनम्। ख—परागतसमीभवनम्। ग—पारस्परिक- समीभवनञ्च। तत्र प्रगत-समीभवने पूर्वव्यञ्जनं पश्चात्तनं व्यञ्जनं स्वसदृशङ्करोति। पाणिनि व्याकरणे पूर्वसवर्णं तदुच्यते। प्राकृतस्य पक्कशब्दानेपाल्याः 'पाको' शब्दचास्योदाहरणम्। अनया प्रक्रियया संस्कृतस्य पक्वशब्दः प्राकृते 'पक्क' संजातः नेपाल्याञ्च 'पाको' इति। परागतसमीभवने च पश्चात्तनेन व्यञ्जनेन पूर्वं व्यञ्जनं स्वसदृशं क्रियते— नेपाल्यां 'कसले' इत्यत्र कल्ले, इति, उसले' इत्यत्र 'उल्ले' इति, त्यसले' इत्यत्र च त्यल्ले, इत्युच्यते। जुम्लाजनपदादिषु च परागतसमीभवनं स्पष्टतरमवलोक्यते। तत्र-"पर्दछ" गर्दछ इत्यादौ पडडोछ गद्दो छ' इत्युच्यते इत्यत्र पश्चात्तनेनपूर्वं व्यञ्जनं स्वसदृशं कृतम। एतच्च संस्कृत-व्याकरणे परसवर्णमुच्यते। पूर्वपरम्वा व्यञ्जनं पारस्परिकप्रभावेण व्यञ्जनान्तरे परिणमति चेत्तत्र पारस्परिक-समीभवनं भवति। वत्स इत्यत्र तकारश्चकारो भवति सकारश्चछकार

१- सा०सुषमा २०२०तमविक्रमाब्दीया द्रष्टव्यम्।
२—वालकृष्ण शर्मणो "राष्ट्रभाषा" केहीपारिभाषिक शब्दहरू इत्यत्र।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति नेपाल्यां 'वाच्छो' भवति। संस्कृतस्य मृत्युशब्दश्च प्राकृते 'मिच्यु' इति, अनेन प्रकारेण भवति। विवर्यासहाराऽयिने पाल्यां शब्दानिष्पद्यन्ते । तत्र च टफ्री-पतरी नजिक-नगिच आनयश्शब्दा उदाहरणम् नासिकीभवनेनापि नेपाल्यां शब्दा भवन्ति संस्कृतस्य अञ्चल- हासं पक्षाक्षिप्रभृति शब्देभ्यः आँ-चल, हाँसो, प्वाँख, आँखो आदिशब्दा जायन्ते। एवं स्वरभक्ति–मध्यस्व-रलोपा ऽऽ दिस्वरयोगाऽऽदिस्वरलोपान्त्यवर्ण लोपैः भगत (भक्त) अप्ठचारो इस्त्री (स्त्री), अच्छइण्' (प्राकृत) 'छैन' भवसि =होस जाति=जात् पङ्क्ति=पाँत् आदयश्च शब्दा भविन्त। अत्र सर्वत्र स्थान्यादेशभाव–ज्ञानार्थ-मादेशानां स्थान्यार्थप्रयुक्तमर्थवत्वमिति च ज्ञानार्थं भाषाविश्लेषकैराधुनि-कैरपि पाणिनीयं वैज्ञानिकं ब्याकरण मध्येयमिति उपसमरन् विरमति ।

सन्दर्भग्रन्थाः -

१–वैयाकरण–भूषणसारः शाङ्करी दर्पण–प्रभासमेतः ।

२–महाभाष्य-प्रदीपोद्योतौ ।

३–लघुशब्देन्दुशेखरः षट्टीकोपेतः,दीपकोपेतश्च ।

४–प्रौढमनोरमा, भैरवी- भावप्रकाश–सरलासमेता ।

५–सिद्धान्तकौमुदी , प्रक्रियाकौमुदी ।

६–सरस्वती सुषमा ।

७–संस्कृत–वाचस्पत्यम्

८--राष्ट्र-भाषा [नेपाली]

००००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रावणीकर्म

केशवराज शर्मा आचार्यः ☫

अयं विषयोऽवश्यं विचारणीयो मननीयश्च । किञ्च समाजेऽस्य कर्मणो ज्ञानं वहुषु जनेषु न विद्यते । इदं कर्म ब्राह्मणपरम्परात आयातमस्ति । परमधुना कथं क्रियते, कृतेन को लाभः ? इत्यादयः प्रश्ना जनानां चेतसि समागच्छन्ति ।

अयं वैज्ञानिको युगः । अतोऽधुना सर्वे कथयन्ति–यदा वैज्ञानिकविधिना यानि वस्तूनि सम्पाद्यन्ते, तैर्वस्तुभिर्व्यक्तेः समाजस्य, राष्ट्रस्य, संसारस्य च कल्याणं भवति । वैज्ञानिका असँस्कृतानि वस्तूनि यन्त्रशालायां संशोध्य वहिर्निः सारयन्ति । यत्र तत्र जनाः परिष्कृतानि वस्तूनि पश्यन्ति, तदा सर्वे जनाः प्रसन्ना भवन्ति । परं तैर्वस्तुभिरेव जनानां मनः शमयितुं न शक्यते । सर्वैर्विचारितव्यम् । अस्माकं यानि कर्माणि सन्ति, तानि भावात्मकानि विद्यन्ते । अस्माकं येऽशुद्धभावा भवन्ति ते सदाचारेण शुद्धयन्ति । अन्येनोपायेन नहि । अतो जीवनस्य संस्काराय क्षमाय च ये ये मार्गाः प्रदर्शितास्ते ते सर्वैरवलम्बनीया एव ।

(१) श्रावण्या दिने रक्षाबन्धनमुपाकर्म च द्वे कर्मणी क्रियेते । सर्वेषां वेदाध्यायिनां कृत उपाकर्म पूर्णिमायामेव कर्तव्यमिति नियतं दिनं नास्ति । धर्मशास्त्रेषु तत्तद्वेदाध्यायिनां पृथक् पृथग्दिनं कथितमस्ति । उपाकर्मार्थं यजुरथर्ववेदाध्यायिनां पूर्णिमा मुख्यकालः, ऋग्सामवेदाध्यायिनां पूर्णिमा गौणकालो विद्यते । अत ऋग्सामवेदाध्यायिनोऽपि पूर्णिमायामुपाकर्म विधातुं शक्नुवन्ति । परमेतयोर्मध्येपृथ (२)ग्वेदाध्यायिनां मुख्यकालः श्रावण शुक्लपञ्चमी वा भाद्र शुक्लपञ्चम्यपि वर्तते । (३)सामवेदाध्यायिनां मुख्यकालो भाद्र शुक्लपञ्चमी विद्यते । अत्रापि सर्वेषां वेदाध्यायिनां स्वस्य स्वस्य नियतः समयो यदि न मिलति चेत्सर्वैः पूर्णिमयामेवोपाकर्म कर्तव्यम् उपाकर्मणो

१- भारतीय व्रतोत्सव पृष्ठ ९३ २- भारतीय व्रतोत्सव पृष्ठ १०१
३- भारतीय व्रतोत्सव पृष्ठ १०२

☫सहायक प्राध्यापकः, या० व० ल० ना० विद्यापीठस्य, मटिहानी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्णयस्तु धर्मशास्त्रस्य निबन्धेषु रक्षाबन्धनेन सह कृतोऽस्ति । अतो रक्षाबन्धनोपाकर्मणोरत्रचर्चा क्रियते ।

उपाकर्म किमिति विषये जनानां मनसि कौतूहलं समुद्भवति । किञ्चाऽधुनाऽस्य कर्मणो यत्र तत्र प्रचलनं न दृश्यते ।

प्रथमं वेद एक एवाऽऽसीत् । पश्चान्मन्दमतयो मानवा भविष्यन्तीति विचार्य व्यासेनैकं वेदं चतुर्धा विभज्य चत्वारो वेदाः कृताः । तदानीं वैदिकमन्त्राणां विनियोगः शिष्टाचारपरम्परया सुस्पष्टमेव विदितो निर्णीत उपयुज्यमानश्चाऽवर्तत । अतो गृह्यसूत्रस्मृत्यादिनामावश्यकतैव नाऽऽसीत् । पश्चात्कलिकलिकालकवलित शिष्टाचारपरम्परास्वल्पमतिषु च जनेषु शिष्टैराचरितानां तेषां नित्यनैमित्तिककाम्यकर्माणां विधेरूहापोह पूर्वकमनुशासनार्थं पारस्करादि गृह्यसूत्राणिस्मृतयश्च व्यधीयन्त तद्दूरदर्शिभिः । ततः सूत्रानुसारं स्मृत्यानुसारंश्च विविधाः पद्धतयो निबद्धा निःसरिताश्च स्वकर्मविधिज्ञैर्विप्रश्चिद्भिः । शनैः शनैर्मानवाः कठिनमार्गात्सरलमार्गमन्विष्यन्तः समागतः अत एवाऽस्माकं पद्धतावपि विषयाः संक्षेपेण निर्दिष्टाः । पुन र्देशे देशे कोणे शास्त्रेषु प्रतिपादिता विषया जनैः परित्यक्ता एव विद्येरन् । वेदेष्वपि शाखाभेदाः सन्ति । तासां शाखानां भिन्ना भिन्नाः पद्धतयो विद्यन्ते । तासु पद्धतिष्वपि न्यूनाधिका विषयाः समाविष्टा अपि वर्तन्ते । अत एवाऽधुना वयं भिन्नां भिन्नां पद्धतिमपि द्रष्टुं शक्नुमः ।

(१) "अथातो ध्यायोपाकर्मः इत्यादिना अध्यायोपाकर्म" इत्यनेन कर्मेदमध्यायोपाकर्म इति व्यवहरन्ति । अत एव वीरमित्रोदय कारोऽपि अधीयत इत्यध्याया वेदाः तेषामुपाकर्म प्रारम्भ इत्येवं व्याचख्यौ । "उपक्रियते प्रारभ्यते वेदस्याऽध्ययनं येन कर्मणा तदुपकरणं नाम कर्मविशेषो विद्यासंस्कार "इत्युक्तं" गोभिलगृह्यभाष्येऽपि प्राप्यते । धर्मज्ञा विद्वांस एतत्, जानन्त्येव वौदिकयुगे द्विजेभ्यो वेदाध्ययनमनिवार्यमासीत् तदा ये वेदानधीयतेस्म ते वेदाध्ययनस्य महोत्सवं कुर्वन्तिस्म प्रतिवर्षम् । अयमुत्सव ओषधीनामुद्भवे सति वर्षतो श्रावणे मासि विधीयते स्म विधीयते च । मनुस्मृतौ २ "श्रावण्यां पौष्ठपद्यां वा ऽप्युपाकृत्य यथाविधि । युक्त-

१-निर्णसिन्धुः- विद्याधर गौड पृष्ठ २५२ २- पौषमासस्य रोहिण्या मष्टकायामथाऽपि वा जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः (या० स्मृ७ (आचारा०) १४३ । पौषे तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः । माघशुक्लस्य वा प्राप्ते पूर्वान्हे प्रथमेऽहनि (मनु ४ । ९६) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् (४ । २५) मिताक्षरायां लिखितमस्ति –" यदा तु श्रावणेमासि ओषधयो न प्रादुर्भवन्ति । तदा भाद्रपदे मासि श्रवणनक्षत्रे कुर्यात् "। अत एवेदं वेदाध्ययनारम्भस्योत्सवस्य नाम " उपाकर्म " कथ्यते । अरम्भानन्तरम् " तत उर्ध्वं सार्धचतुरोमासान्वेदानधीयीत " इत्युक्तञ्च सार्धचतुरमासान् यावत्प्रतिदिनंवेदानधीत्य ततो पौषमासे रोहिणी नक्षत्रयुक्तदिने जलान्ते गत्वोत्सर्जनं क्रियतेस्म । ये पौषे माघे वोत्सर्जनं कर्तु न शक्नुवन्ति स्म त आरम्भदिन एवोत्सर्जनं विधाय तत उपाकर्मकुर्वन्ति स्म । तदनन्तरमुत्सर्जनमुपाकर्म च द्वे कर्मण्येकस्मिन्दिन एव कुर्वन्त आगता आसन् । द्विजसमाज इयमेव परम्परा बहुकालपर्यन्तं प्रचलिता । इदानीमियम्परा यत्र कुत्रस्थले प्रचलिता स्यात् । अन्यथा तु लुप्तप्रायैव भवेत् । पुरेमे द्वे कर्मणी गुरवः शिष्यैः सह मिलित्वा कुर्वन्ति स्म । पश्चात्तादृशानां शिष्याणामभावेऽन्यान्ब्राह्मणानानीय गुरवः कृतवन्तः । येषामुपनयनकृतमासीत् तेषामिदं कर्मा ऽनिवार्यमवित्त । किञ्च द्विजा वेदान्पठेयु र्न विस्मरेर्पुरि त्याशयेन । इयन्मात्रं नहि वर्षमध्य एकस्मिन्दिनेऽपि स्वं स्वं वेदमधीयीरन्नित्यभिप्रायेण च । अत एवोपाकर्मसङ्कल्पेऽपि "मयाऽधीतानामध्येष्यमाणानाञ्च छन्दसां यातायामतानिरासेनाऽऽप्यायन द्वारा" इति वाक्यं संयोज्य पठ्यते । अधुनाऽयमुपाकर्मोत्सर्जनविधिर्यत्र तत्र न दृश्यते । यदि क्रियते चेद्विरलमेव । (१) द्विजानां वेदाध्ययनायऽधिकारस्तु विद्यते । पर सम्प्रति वयंब्राह्मणा वेद मनधीत्या ऽन्यान्विषयान धीयानाः स्मश्चे त्क्षत्रियवैश्याणांकृते किमु । यद्यपि केचन स्युःपरं स्वल्पाएव ? ।

अद्यत्वे तु पाश्चात्यशिक्षायाः प्रभावेण पाश्चात्यदेशवाससम्पर्केण च द्विजैः शास्त्राचारेषु कुलाचारेषूल्लिखितानि नियतानि कृत्यानि कर्माणि परित्यक्तानि सन्ति। तदा के विदन्ति स्वानि कर्माणि? ततः समाजेजना द्विजशब्दस्य कोऽर्थः? इत्यादीन्प्रश्नान्कुर्वन्ति।किञ्चाऽधुना यत्र तत्र वेदाध्ययनस्य परम्पराया एव शृङ्खला विच्छिन्ना वर्तते । क्वचिद् क्वचिद् वेदाध्ययनाय संस्था तु स्युः परं नगण्या एव विद्येरन् । अतोऽस्य कर्मणो ज्ञानं कथं भवेत? । इदमुपाकर्म तु वेद ध्ययनेन सम्बन्धं स्थापयति । अत एव वयं शक्नुमश्चे दुपाकर्म बृहद्रूपेण कुर्यास,न शक्यते चे त्समासतः कुर्वीमहि । परं कर्माणि तु न त्यजेम (अन्यथा कर्माणि लुप्तानि भवेयुः । ततः"छिन्ने मूले नैव शाखा न पत्रम्"स्यात् । इमामुक्तिमपि न विस्म-

१- ब्राह्मणक्षत्रियवैश्याः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राम–" श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुतिष्ठात्" "यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।

(१) उपाकर्मणि क्रियमाणानि कार्याण्येतानि सन्ति । तेषां क्रमः–१) प्रातः स्नानम्, २) प्रातः सन्ध्या, ३) नित्यतर्पणम्, ४) षोडशमातृपूजनम्, ५) नूतनोपाकर्मकारिणांमाभ्युदयिकश्राद्धं तच्च गुरूकर्तृकम् ,६) उदकान्ते गमनम् ७) तीर्थप्रार्थना, ८) उत्सर्गोपा कर्माङ्गं नित्यस्नानविधिना स्नानम्–(स्नाने प्रयुज्यमानानि वस्तूनि–मृत्तिका, गोमयम्, भष्मलेपनम्,अपामार्गः ,दूर्वा) (९– स्नान तर्पणम् , १०) मध्याह्नसन्ध्या , ११) बृहदुपष्थापनम् १.) उत्सर्गोपाकर्माङ्गं तर्पणम् , १३) गणपतिपूजनम् १४)स्वस्तिवाचनम् १५) उभयाङ्ग मृषिपूजनम् , सप्तर्षिपूजने यद्यपि क्रमो ऽनेकविधः स्मृतिषु दृश्यते तथापि(२)„कश्यपोऽथ भरद्वाजो गौतमश्चात्रिरेव च। जमद्वग्नि र्वसिष्ठश्चविश्वामित्रो महामनाः।एते देवर्षयः सप्त साध्वीचैवाप्यरून्धती। पूजनीया विशेषेंण वेदोत्सर्जनकर्मणि " । इतिक्रमो बहुत्र बहुभिरास्थीयते । ३"अपामार्गसंमिश्राणां कुशादीनां त्रिभिस्त्रिभिः। कुर्यात्सप्त ऋषींश्चैव पूजयेच्च यथाक्रमम् । इतिवचनात्कुशैरपामार्गसंमिश्रैः सप्त ऋषीन्कुर्वन्ति १६) उभयाङ्गमृषितर्पणम्, १७) ब्रह्मयज्ञा, १८) इषेत्वादि पाठः, १९)ऋषिश्राध्दम् , २०) यज्ञोपवीतदानम्, २१) यज्ञोपवीतसंस्कारः, २२) यज्ञोपवीतधारणमं २३) उपाकर्म,२४)हवनम्, २५)ब्रह्मयज्ञः, २६)इषेत्वादिपाठः, २७)उभाकवी सहनो ऽस्तुइतिजपः, २८)रक्षाविधानम् ।। सम्प्रतित्वेतानि कर्माणि द्विजैः क्रियमाणा न्यतिविरूपेण भवेयुः ।।

वायुनन्दमिश्रेण समुद्भासितायां श्रावणीप्रयोगपद्धताविमेक्रमा संस्थापिताः सन्ति– १) तीर्थप्रार्थना, २) स्नानसङ्कल्पः, ३) स्नानविधिः[१) तोयाभिमन्त्रणम्, २)आलोडनम्,३)जलप्रक्षेपणम् ४)मृत्तिकास्नानम् ५)गोमयस्नानम्, ६) भस्मस्नानम्,७) नाभिमारभ्य शिर उपरि जलेन पावनम्,८)ततोऽपामार्गेण मार्जनम्] ४) स्नानाङ्गतर्पणम्, ५)कुशैर्मार्जनम् ६) अघमर्षणम् ७) तर्पणप्रयोग,८)ऋषिपूजनम्– (शान्तिपाठपठनम्, न्यासः,ऋषिप्रार्थना,ध्यानम्, पूजा) ९) यज्ञोपवीतधारणप्रयोगः–– सूत्रत्रिगुणं करणम्,प्रक्षालनम् ,तन्तुदेवानामावाहनम्,पूजनम्,धारणञ्च), १० उत्सर्गाङ्गतर्पणम् ,देवतर्पणम्, पितृतर्पणम्,ऋषि–

१-निर्णयसिन्धुः-विद्याधर गौड पृष्ट– २५७ ।

२- आह्निकसूत्रावलिः पृष्ठ ३१३ ।

३- आह्निकसूत्रावलिः ३१३ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तर्पणम् । सम्प्रति द्वयोर्विध्योमध्ये द्वितीयो विधिरेव प्रचलने विद्यते। अत्रापि द्वितीयं विधिमपि सर्वमकृत्वा संक्षेपेण कुर्वन्ति श्रावणीकर्मकर्तारः ।

रक्षावन्धनम्- रक्ष् धातो भवि घञि टापि रक्षा । बन्ध् धातो ल्युटि- बन्धनम् रक्षासूत्रेण बन्धनं रक्षार्थं वन्धनं वा रक्षाबन्धनं भवति ।(१)सूयतेऽनेन सूत्रम्,तन्यतेऽनेन तन्तुः । अनेन प्रकारेण रक्षाबन्धनं रक्षासूत्रं रक्षातन्तुश्च भवति सर्वे समानार्थका एव विद्यन्ते ।

पूर्वमुक्तमस्ति रक्षावन्धनं पूर्णिमायां विधीयते। प्रथममुपाकर्मण्यृषीणो पूजनं विधाय ततो रक्षाबन्धनंक्रियते।यद्यस्मिन्दिने भद्रा भवति चेत्तदा भद्रानन्तरं रक्षासूत्रं बन्धनीयम् । रक्षाबन्धनस्य विधिरूपाकर्मणा सह कर्तव्य इति नियमो नास्ति।विधिस्तु पृथगपि वर्तते परंकर्मकरणसमये सौकार्यार्थं जना ऋषिपूजनेन सहैव रक्षावन्धनस्य पूजनं कुर्वन्ति । यदि पृथक् क्रियते चे द्विधिर्विद्यते । प्रथमं भूमिं संशोध्य गोमयेन भूमिमुपलिप्यतत्र रङ्गावलिं विधाय पुटपात्रे धान्यं नि- धायपुटपात्रा भावे भूमावपि धान्यं निधाय तदुपरि कलशं संस्थाप्य कलशस्य मुखे वेदमन्त्रेण वरूणदेवस्य पूजनं कृत्वा संभवे सति कलशस्य मुखमुपर्येकां स्था- लीकां निधाय तदुपरि रक्षासूत्रं संस्थाप्य तन्तुदेवानां पूजनं कर्तव्यम् । ततः पूजां समाप्य ब्राह्मणै "येन वद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वां प्रतिवध्नामि रक्षे मा चल मा चल ।" इतिश्लोकं पठित्वा बध्यते ।

रक्षावन्धनार्थं कः कोऽधिकारी भवितुं शक्नुयादिति कस्यापि जनस्य मनसि जिज्ञासा समुद्भवितुं शक्नोति । अत एवोक्तश्च "ब्राह्मणैः क्षत्रियै र्वैश्यैः शूद्रै- रन्यैश्च मानवैः । कर्तव्यो रक्षिताचारो द्विजान्सम्पूज्य शक्तितः" । इति वचना त्समाजस्य सर्वेषां जनानामधिकारोऽस्तीति दृश्यते ।

अस्मिन्दिने रक्षाबन्धनं किमर्थं क्रियते ? इति जनानां मनसि कौतू- हलं भवितुं शक्नोति । रक्षाबन्धनस्य कथाप्रसङ्गे वर्णितमस्ति यदनेन कर्मणा ऽऽयुरारोग्यश्च वर्धते । किञ्च पूर्णिमादिने चन्द्रिकया सोमः पूर्णो भवति, तदा यत्र तत्र तमो नश्यति । पुनः श्रवणनक्षत्रस्य स्वामी विष्णुरस्ति । विष्णुः संसारस्य पालको देवो वर्तते । अस्मिन्दिने पूर्णचन्द्रिकायुक्तः सोमः जगत्पालको देवो विष्णुश्च द्वा एकत्र विद्यते । आयुरारोग्यवृद्धये रक्षणाय चाऽस्माकमिमौ देवौ मुख्यौ स्तः । अतएवेमौ देवौ संस्मृत्य रक्षाबन्धनस्य महत्वं गीयते ।

पुरा दैत्यराज स्त्रिलोकमधिकृत्य स्थितो विद्यतेस्म, तदातेन सर्वे

(१)– क्षीरस्वामी, अमरकोष,२खण्ड,भूमिवर्ग २८ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाः स्वर्गान्निराकृता आसन् । ततस्ते देवाः प्राणरक्षार्थं संलग्ना बभूवुः । तदा बृहस्पति र्देवानामीदृशीं दशामवलोक्येन्द्रमुवाच – हे इन्द्र ! अद्य चतुर्दशी वर्तते । श्वः प्रातः सम्यक् भविष्यति । मा शोच । अहं रक्षाविधानं करिष्यामि । यतः सर्वेषां कल्याणं भविष्यति । ततो बृहस्पतिः पूर्णिमादिनस्य प्रातरेव रक्षाविधानं करोति स्म । ततो रक्षासूत्रं नीत्वा "येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल" । इति वचनं पठित्वेन्द्रं बबन्ध । रक्षाबन्धनस्य कथानुसारेण प्रथमं बृहस्पतिस्तत इन्द्राणी चेन्द्रं रक्षासूत्रेणाऽबध्नात् ।

तदनन्तरमिदमेव प्रचलनमवलम्ब्य समाजेषु सौभाग्यवत्यः स्त्रियः पुरुषानृक्षाबन्धनेन बध्नन्ति स्म । पश्चाद् पुरुषाविचारमकुर्वन्यत् स्वस्य पत्न्या हस्ताद्रक्षाबन्धनं प्रबध्य पत्न्यै दक्षिणा दातुं न शक्यते । अतो यस्यै दक्षिणा दातुं शक्यते तस्या एव हस्ताज्जनै रक्षाबन्धन मुचितमिति विचार्य भगिन्या हस्ताद्रक्षाबन्धनं क्रियतेस्म । अधुनाऽपि नेपालस्य तराइप्रदेशेषु भारतस्य कतिपयेषु प्रान्तेषु च भगिन्यो भ्रातृनृक्षासूत्रं बध्नन्ति ।

पुरा कदाचित्केनापि कारणेन कृष्णस्य हस्ताद्रुधिरं स्रुतम् । तदा द्रौपदी स्वस्यचीरेण कृष्णस्य हस्तमबध्नात् । रुधिरमप्यवरुद्धम् । पश्चाद् दुःशासनेन राजसभायां द्रौपद्याः शाट्याकर्षिता । तदा कृष्णेन चीरं दत्त्वा द्रौपद्या लज्जा रक्षिता । अनेन प्रकारेणोभौ परस्परं कल्याणं चक्रतुरिति मन्यते ।

भारते मध्यकाल इयं व्यवस्थाऽतीव प्रचलिताऽऽसीत् । अनेन व्यवहारेण नारीपुरुषौ परस्परं भगिनीभ्रातरौ स्मृतवन्त आस्ताम् । श्रुयतेयत्– चित्तौडस्य राज्ञी कर्मवती विख्यातं बादशाहमकबरस्य पितरं हूमायू इति नामधेयं तदा स्वस्योपरि विपदि समागतायां सत्यां (१) रक्षाबन्धनं प्रेष्याऽऽत्मनो भ्रातरं कृतवती । तथा विपदपि दूरीकृता ।

अस्माकमधिकेषु धार्मिककृत्येषु रक्षाबन्धनं निर्मीयते । रक्षाविधाने यवान्कुशान्दूर्वाः सर्षपान्गन्धमक्षतान्गोमयं दधिसहितं विधाय ताम्रभाजने संस्थाप्यहस्ते नीत्वा नारायणकवचं पठ्यते । ततो रक्षाबन्धनस्य पूजनं विधाय कर्मान्ते रक्षाबन्धनं पुरुषा दक्षिणकरे नार्योवामकरे बध्नन्ति । अनेन बुध्यते यत्, वैदिकसनातनसमाजे रक्षाबन्धनस्याऽतीव महत्वं विद्यते ।

१– राखी इति हिन्दी भाषायाम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेदा ब्रह्मणो मुखतो निः सृता । तेषां वेदानांमृषयो द्रष्टारो बभूवः वेदानां स्मरणार्थमस्माकं पूर्वजैः श्रावणीकर्म विहितम् । सदाचारशीलवतां दूरदर्शिनां मन्त्रद्रष्टणां परोपकारिणां पूर्वजानां महर्षीणां वयं केन–प्रकारेण स्मरणं पूजनञ्च शक्नुम इति विचारयामः । किञ्च येषां ज्ञानेन संसारे मानवानां हृदयं प्रकाशितमस्ति । यदा मानवानां चेतसि भयमा-लोऽथति । तदा तन्निवारणार्थं कः समर्थो भवति ?। ता न्महर्षी भयनिवा-रणार्थकान्नाध्यामिकज्ञानपथप्रदर्शकान्वयं न स्मरामो न पूजयामश्चेदन्ये के स्मरेयुः पूजयेयुश्च । अतः समयानुसारं पूर्वजानां स्मरणं पूजनञ्चऽऽवश्यकम । पूर्वजैर्यज्ज्ञानं दर्शितम् या संस्कृतिः या सभ्यता निर्मितो स्थापितान् यदि वयं तज्ज्ञानं तां संस्कृतिं तां सभ्यताञ्च न रक्षामश्चेद् को रक्षेत् ? ।

समस्तवैदिकसनातनधर्मावलम्बिनां जनानामेव नहि समस्तमानवानां वेदा एव संस्कृतेः सभ्यतायाः परम्पराया विकासस्थ जीवनदर्शनस्येतिहासस्य च महान्तो निधयः सन्ति । वयं का मेतादृशान्वेदानग्रे न स्थापयामश्चेत्तदा समस्तवैदिकसनातनधर्मावलम्विनां का गतिः ? । सूक्ष्मदृष्टाया विचारयामः पूर्वजैः कृतानां कर्मणां विजयस्तम्भानामभिलेखानां स्मरणीयानां स्थलानां पुरातात्त्विकवस्तूनाञ्च संरक्षणं ण कुर्महे चे त्तदा किं स्यात् ? । एतेषां संरक्षणनेन यदि हानिरेव भवति चेत्संरक्षनं कः कुर्यात् ? । प्रगतिरेवाऽवरूद्धा भवति चेत्तादृशानां ज्ञानानामध्ययनं वृथैव भवेत् । अतो वयं परितो विचार्याग्रे सरामः । केवलं दोषं प्रदाय कस्यापि लाभो न भवेत् ।।

०००००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेदान्तविनोदः

दामोदर शर्मा*

"घनच्छन्नदृष्टि र्घनच्छन्नमर्कं
यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवद् भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ।।" इति

पद्यं श्रुत्वा जिज्ञासा जायते– 'स घनच्छन्नदृष्टिरतिमूढः कः ? येनार्को घनच्छन्नो निष्प्रभश्चमन्यते, स मूढदृष्टिः कः ? यस्य नित्योपलब्धिस्वरूपो ऽबद्धोऽप्ययमात्मा बद्धवद् भाति इति ।

यद्यात्मैवेत्युच्यते तदा तस्याबद्धत्वं व्यांहतं भवति, मूढदृष्टेरतिमूढस्याबद्धत्वासंभवात् = अतिमूढोऽप्यस्त्यबद्धोऽप्यस्तीत्यसंभवात् । यद्यात्मेतरस्यातिमूढत्वमुच्यते तदा 'आत्मेतरोऽपि बध्यते मुच्यते च इति स्वीकर्तव्यम्' इत्याति, यदि तथैव स्वीक्रियते, तदा आत्मेतरस्य घटादे र्बद्धत्वमुक्तत्वादिकं न भवतीति कथं वक्तुं शक्यम् ?न कैरप्युच्यते 'घटादि र्बध्यते मुच्यते च, इति ।

तथा च मूढदृष्टि पदेनातिमूढपदेन च कस्य ग्रहणं क्रियेत येनात्मनोऽबद्धत्वमप्यव्याहतं तिष्ठेत् घटादिषु च बद्धत्वमुक्तत्वादिकं नापतेत् ? इति ।

तत्रोच्यते– आत्मप्रतिविम्वसमन्विता बुद्धिस्तत्र मूढदृष्टिपदेनोच्यते (तथा बद्धवद् भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा इत्यत्र) । अर्थात् यत्र आत्मप्रतिविम्बस्तत्र मूढदृष्टित्वं विवक्षितम्, न घटादौ आत्मप्रतिविम्बो भवति अतो घटादिकं न मूढदृष्टिपदेनोच्यते, अतो न घटादे र्बद्धत्व मुक्तत्वादिप्रसङ्गः । बुद्धे स्तु बद्धत्वमुक्तत्वादिकमस्त्येव । यथेश्वरकृष्णोक्तिर्विद्यते– "तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ।।" इति ।

(सांख्यकारिका)

प्रकृतिपदेनात्र बुद्धिरूपेण परिणता प्रकृतिः, अर्थात् बुद्धिरेव गृहीता विद्यते ।

मूढदृष्टिपदेन आत्मा न गृहीतः, अतस्तस्याबद्धत्वं मूढदृष्टिपदेन न व्याहतम् ।

---

*सह प्रा. जनताविद्यापीठम् दाङ्ग, नेपाल

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदं तु दार्ष्टान्तिककोटौ विचारितम्, दृष्टान्तकोटौ विचारणीयम्, तत्रातिमूढत्वमुक्तमस्ति , दार्ष्टान्तिककोटौ मूढत्वमात्रमुक्तमासीत् , मूढदृष्टित्वं नाम मूढत्वम्, अतिमूढत्वं चातिमूढदृष्टित्वम् । मनागेव सूक्ष्मविचारणेनास्माभिरपीदानीमेव च ज्ञातुं शक्यमप्यज्ञात्वा स्थितिविरुद्धमुक्तमस्तीति दृष्टान्तकोटौ अतिमूढत्वं भणितम्, मनागपि सूक्ष्मविचारे विहिते को ज्ञातुं न प्रभवति 'घनेन तदधः स्थितास्मददृष्टिश्छादिताऽस्ति, न तदुपरितनदेशस्थः सूर्यः' इति ?, तथापि तावदप्यविचार्य 'सूर्यो घनेनच्छादितोऽस्त्यतो निष्प्रभोऽस्ति' इति मनुते' इति ।

दार्ष्टान्तिककोटौ तथा स्थितिर्नास्ति , अतिसूक्ष्मविचारत एव 'आत्मा वस्तुतोऽबद्धोऽस्ति' इति ज्ञातुं शक्यते, अतस्तदज्ञानेनातिमूढत्वकथनं नोचितायते इति तत्र मूढत्वमात्रं भणितम् ।

तत्र दृष्टान्तकोटावप्यतिमूढत्वं वस्तुतो बुद्धावेव भणितमस्ति इत्यपि साधनीयम्, आत्मनोऽतिमूढत्वेन विवक्षितत्वे तस्यावद्धत्वोक्तिव्याहतेस्तादवस्थ्यापत्तेः । अतस्तत् साध्यते–

दृष्टान्तोऽयमात्मन्यवद्धत्वं निर्लिप्तत्वं साधयितुं प्रवृत्तः, यदि तत्रातिमूढत्वमात्मन्युच्येत तर्हि तेन दृष्टान्तेन प्रतिपिपादयिषितमात्मनोऽवद्धत्वादिकं प्रतिपादितं भवितुं न शक्नोति, तत्रैव दृष्टान्ते आत्मनि वृद्धत्वाव्यभिचारिणाऽतिमूढत्वेन वद्धत्वादे रात्यन्यावश्यत्वात् । तथा च तेन दृष्टान्तेन प्रतिपियादयिषितं यथा प्रतिपादितं भवितुं शक्नोति तथैवार्थः करणीयस्तस्य दृष्टान्तस्य । तत्र बुद्धौ अतिमूढत्वे उक्ते तेन दृष्टान्तेन प्रतिपियादयिषितं प्रतिपादितं भवति,आत्मन्यतिमूढत्वे उक्ते न भवति'इत्येव प्रमाणं दृष्टान्तवाक्येऽप्यतिमूढत्वं बुद्धावेवोक्तमस्ति,नात्मनि' इत्यत्र । कुतः ?

यत् यत्कार्यसम्पत्तयेप्रवर्तते तेन तत्कार्य विघ्नकोटि निवारणेनापि सम्पादनीयम्,तत्कार्यसम्पत्तये तेन महाकठिनान्यपिकार्याणिकरणीयानि, यथा ऽस्मदीयप्रारब्धेन स्वकीयतत्तज्जननीयसकल भोगप्रदानरूपकार्यसम्पत्तये जातमात्राणामप्यस्माकं पूर्वजन्मानुभूतमातृदुग्धपाननिष्ठेष्ठसाधनत्वसंस्मारणादिरूपमहाकठिनकार्याण्यपि क्रियन्ते । तथैव आत्मनि अवद्धत्वसाधनाय प्रवृत्तेनानेन दृष्टान्तेनापि स्वकार्यसिद्धयनुकूलानि महाकठिनान्यपि कार्याणि क्रियन्ते,तद्विपरीतानि विघ्नसहस्राण्यपि निवार्यन्ते, तथा च तत्र दृष्टान्ते आत्मनि अतिमूढत्वग्रहणं तेनैव दृष्यान्तेन निवार्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किंच , आत्मनो ऽसंसारित्वसाधनाय तादृशदृष्टान्तदर्शयितृजनानामपि तात्पर्यं ज्ञातव्यं तादृशदृष्टान्तवाक्यार्थबोधसम्पत्तये, तात्पर्यज्ञानस्य शाब्दबोधं प्रतिहेतुत्वात्,तेषां च तात्पर्यं स्वसिषाधयिषितसिद्धयनुकूलमेव कल्पयितुं शक्यम्, न तु तद्विपरीतम् , आत्मन्यतिमूढत्वविवक्षा तु सिषाधयिषित यदात्मासंसारित्वं तत्सिद्धिप्रतिकूलैवास्तीति आत्मन्यतिमूढत्वं विवक्षितं नास्तीति विज्ञायते । बुद्धावतिमूढत्वोक्तिस्तु सिषाधयिषितात्मासंसारित्वसिद्धयनुकूलैवास्तिइति। तत्रैव वक्तृतात्पर्यं स्वीकर्तुं शक्यम्,इति नात्माऽतिमूढत्वेन तत्राप्युक्तो विद्यते ।

बद्धौ पतित आत्मप्रतिविम्ब एवं वा मूढदृष्टिपदेनातिमूढपदेन वोच्यते, बुद्धयात्मप्रतिविम्बसमाहारो वा मूढदृष्टिपदेनातिमूढपदेन वोच्यते,बुद्धयात्मप्रतिविम्बसम्बन्धो वा मूढदृष्टिपदेनातिमूढपदेन वोच्यते, नात्मेत्यात्माऽसंसार्येव सिद्धयति ।

ननु'आत्मातिरिक्तं किमपि वस्तुतो नास्ति'इति वादिभि र्भवद्भिः कथं 'मूढदृष्टिपदेनातिमूढपदेन वा आत्मातिरिक्तबुद्धयादिकमेव गृह्यते 'नात्मा' इत्युच्यते ?-इति चेत् ,

आत्मातिरिक्तं किमपि वस्तुतो नास्ति' इत्यस्मदीयमतं स्वीकुर्वन्ति चेत् भवन्तः अस्मदीयं 'मूढदृष्टिपदेनातिमूढपदेन वा बुद्धयादिकमेव गृह्यते, नात्मा' इति वचनं विद्यमानतया न स्वीकुर्वन्ति, यतस्तथा वक्तुं न प्रभवन्ति । यदि 'आत्मातिरिक्तं किमपिवस्तुतो नास्ति' इत्यस्मदीयमतं न स्वीकुर्वन्ति , तर्ह्यपि भवन्तस्तथा वक्तुं न प्रभवन्ति, कुतः ?'आत्मातिरिक्तं किमपि वस्तुतो नास्ति' इति मतस्यैव भवद्भिरस्वीकृतत्वात् , तन्मता स्वीकर्तृभिर्जनैः 'कथं वस्तुतोऽविद्यमानं बुद्धयादिकं गृह्यते ? ' इतिवक्तुमशक्यत्वात् , बुद्धयादिकस्याविद्यमानतयैवास्वीकृतत्वात् । एतत्तत्त्वतात्त्विकबोधसौकर्याय काचनैका वैदान्तिक गुरूशिष्ययोः कथा श्राव्यते—

गुरूः स्वशिष्यं प्रति 'ब्रह्मातिरिक्तं सर्वं मिथ्या ज्ञेयत्वात् स्वप्नसंसारवत् इत्युक्तवान्, तदनन्तरं तौ गुरूशिष्यौ सहैव कुत्रचलितौ , मार्गेऽग्रतः चलनोन्मत्तहस्ती आगच्छन् दृष्टः,तं दृष्टवा भीत्या पलायमानं गुरूं प्रति शिष्यः कथयति 'भो गुरूचरणाः! कुतो बिभ्यति ? हस्ती तु वस्तुतो नास्ति' इति तदा गुरूणोक्तम् ' महामूर्खो ऽसि , किं वदेयम् ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'ब्रह्मातिरिक्तं किमपि वस्तुतो नास्ति' इति बोधितोऽपित्वं मयि भीतिं वस्तुतो विद्यमानां मनुषे, मदीयं त्वद्बोधनं व्यर्थमेव जातम् । अन्ययाऽपि रीत्या महामूर्खोऽसि, मया ब्रह्मातिरिक्तं सर्वं वस्तु मिथ्या भणितम्, तत्र ब्रह्मातिरिक्तसर्ववस्तु-मध्ये त्वया हस्ती तु मिथ्या मन्यते, मदीया भीतिस्तु तथा न मन्यते, मदुक्तं सर्वं वा स्वीकर्तव्यम्, सर्वं वाऽस्वीकर्तव्यम्, नार्धजरतीयं लभ्यम्" इति । तदा शिष्यःस्वकीयामनभिज्ञतां गुरोरभिज्ञताम्,अर्थात् स्वकीयमूर्खतां ज्ञात्वा लज्जितोऽवाङ्मुखस्तिष्ठतिस्म ' इति ।

अनया कथया भवद्भिः स्वस्मिन् विद्यमानाऽनभिज्ञता स्फुटं द्रष्टुं शक्या, कथम् ? भवद्भिरपि तु उक्तशिष्येणेव ब्रह्मातिरिक्तसर्ववस्तुमध्ये किञ्चिन्मिथ्यात्वेन किं चिदमिथ्यात्वेन स्वीकृतम् , कथम्? ब्रह्मातिरिक्तबुद्ध्यादेस्तु भवद्भिर्मिथ्यात्वमुक्तम्, तत्र मूढदृष्टित्वाद्युक्तेस्तु मिथ्यात्वं न स्वीकृतम्, यदि स्वीकृतमभविष्यत्तर्हि 'इयं मूढदृष्टित्वाद्युक्तिः कथम् ? 'इत्युक्तं नाभविष्यत्,मूढदृष्टित्वाद्युक्तेर्मिथ्यात्वे स्वीकृते तस्या वस्तुतोऽविद्यमानतानिश्चयेन , सा कथं सङ्गच्छते ? ' इति प्रश्नस्यैवासंभवात् ।

अतो ब्रह्मातिरिक्तस्य सर्वस्यैव गङ्गास्नानसप्ताहयज्ञमातापितृसेवा-गुरूभक्तीश्वरभक्त्यादेरपि मिथ्यात्वं साधयदपि वेदान्तशास्त्रं न आस्तिक्यं विनाशयति ह्रासयति वा, न वा नास्तिक्यं जनयति पालयति पोषयति वर्धयति वेति तत्र तत्र निगदितं विद्यते ।

ननु भवन्तः अप्रामाणिकाः, कथम् ? भवद्भिरुच्यते 'घटादिकं मिथ्या दृश्यत्वात् स्वाप्निकप्रपञ्चवत् ' इति , तत्र यत् मिथ्यात्वं साध्यते तत् मिथ्या अमिथ्या वा ? , यदि मिथ्या तर्हि घटादेः सत्यत्वमावश्यकम्, यत्र मिथ्यात्वं नास्ति तस्य सत्यत्वे कः सन्देहः ?, मिथ्यात्वस्य मिथ्यात्वे 'घटादौ मिथ्यात्वं नास्ति' इत्यपि सिद्धमेवास्ति । यदि मिथ्यात्वममिथ्यातर्ह्यपि घटादेः सत्यत्वमावश्यकं समजनि, सत्यभूतस्य मिथ्यात्वस्य आधारीभूतं घटादिकं कथं मिथ्या भवितुं शक्नुयात् ?। अतः कथमपि घटादेर्मिथ्यात्वं नोपपद्यते , तादृशानुपपत्तिग्रस्तस्यापि भवतां वक्तृत्वात् । तथा च भवदुक्तं किमपि कथं स्वीक्रियेत ? अर्थात् अप्रामाणिकोक्तेषु कथं पूर्णविश्वासः स्यात् ?। एवं च भवदुक्तं ' मूढदृष्ट्यतिमूढपदाभ्यां बुद्ध्यादिकमेव ग्राह्यं नात्मा' इत्यविश्वसनीयं सम्पन्नम् । किंच, मिथ्यात्वस्य मिथ्यात्वेऽमिथ्यात्वेऽपि द्वैतापत्तोरनिवार्यत्वाद् भवदीयाद्वैतसिद्ध्यनुपपत्तिश्च,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति चेच्छ्रूयताम् –

मिथ्यात्वमिथ्यात्वेन घटादिसत्यत्वावश्यकत्वे एव तु अस्मदीयाप्रामाणिकत्वमस्मदीयाद्वैतसिद्धान्तसिद्धचनुपपत्तिश्च आपद्येते, तादृशावश्यकत्वमेव नास्ति, 'एकस्य मिथ्यात्वेऽपरस्य सत्यत्वम्' इति व्याप्तेरभावात्, अतो मिथ्यात्वस्य मिथ्यात्वेऽपि घटादेरपि मिथ्यात्वं भविष्यति । मिथ्यात्वमपि दृश्यान्तःपतितं मिथ्यैव भवतु, घटादिरपि दृश्यान्तःपतितो मिथ्यैव भवतु,का अपत्तिः? । उभयमिथ्यात्वेऽपि काऽप्यापत्तिरनुपपत्ति र्वा नास्ति । ननु पूर्वं मिथ्यात्वस्य आधारीकृतो घटादिरिदानीं मिथ्यात्वस्य मिथ्यात्वसिद्धौ कुतो न सत्त्यः सिद्धयेत् ? इति चेत्, दृश्यमात्रस्य मिथ्यात्त्वसाधकेन दृश्यत्त्वहेतुना दृश्यान्तःपतितस्य आधाराधेयभावस्यापि समापितत्त्वात्, आधारीकृतो घटादिः' इत्त्यादिस्थितेरेव लोपितत्त्वात् 'आधारीकृतो घटादिः' इत्त्यस्येदानीं वक्तुमशक्यत्त्वात् ।

मिथ्यात्त्वस्य सत्त्यत्त्वेऽपि घटादेः सत्त्यत्त्वं तु नापद्यते, भवतु मिथ्यात्वं सत्यम्, तेन घटोऽपि सत्यो भवत्विति कथमागच्छेत् ? ।

वस्तुतः मिथ्यात्वेन कीदृशेनापि सत्येन मिथ्याभूतेन वा स्वसमाप्तिभिया घटादिः सत्यो न भाव्यते, घटस्य सत्यत्वे तस्य मिथ्यात्वमेव समाप्यते, तादृशमिथ्यात्वेन घटादेः सत्यत्वं कथं साधनीयम् घटादेरसत्यत्वं विना मिथ्यात्वस्य सिद्धिरेव नास्ति, तेनैव मिथ्यात्वेन स्वपूर्वसिद्धस्य घटाद्यसत्यत्वस्य विनाशस्य कर्तुमशक्यत्वात्, (अत्र विनाशस्येति कर्मणि षष्ठी घटाद्यसत्यत्वस्येति शेषषष्ठी स्मर्तव्या) तथा सत्युपजीव्यविरोधप्रसङ्गात् । भवतूपजीव्यविरोधः का क्षतिः? इति चेत्तथा सति समीहितसिद्धयभावरूपा क्षतिरस्ति, यथा–

घटसत्यत्वप्रसङ्गे नैव मिथ्यात्वमेव घटस्य समाप्यते, किंवलेन पुनः घटसत्यत्वं वक्तव्यम्' इति भवत्समीहितघटादिसत्यत्वसिद्धयभावरूपा क्षति र्भवत्सु सभायातत्येका क्षतिः, 'घटसत्यत्वे सति स्वीकृतं घटादे र्मिथ्यात्वं क्षीयते' इत्यपरा क्षतिः ।

एतादृशं स्वसमाप्त्यनुकूलकार्यं केनापि क्रियमाणं न दृष्टम् मिथ्यात्वेनापि तादृशं कार्यं न करणीयम् इति तेन सत्येन मिथ्याभूतेन वा कीदृशेनापि मिथ्यात्वेन घटसत्यत्वसिद्धि र्न क्रियते । एतत्तत्त्वतात्त्विकवोध सौकर्यधियैको वैयाकरणो दृष्टान्तो दर्श्यते –

निर्जरशब्दाद् भिस्विभक्तौ तस्याः 'ऐस्' इत्यादेशेन,निर्जर ऐस्'

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति जाते वृद्धौ रुत्वे विसर्गे च 'निर्जरैः, इति रूपं सिद्धयति, तत्र, निर्जर ऐस्' इत्यवस्थायां 'जराया जरसन्यतरस्याम्' इति सूत्रेण जरसादेशः कुतौ न भवति ? इत्यत्रोच्यते उपजीव्यविरोधान्न जरस्' इति, अर्थात् 'ऐस्' इत्यजादिविभक्तिमाश्रित्य जरसादेशः कार्यः,जाते जरसादेशे ऐसादेशस्य अदन्ताङ्गरूपनिमित्तनाशात् ' निमित्तापाये नैमित्तिकस्याप्यपायः' इति नियमेन नाशः प्रसज्यते इति ऐसादेशः स्वनिमित्तकजरसादेशेन भाविनं स्वनाशं विलोक्य ' येनाहमेव नाशनीयः स कथं मयोत्पादनीयः, मामकारणीकृत्य स उत्पत्तुं नार्हति, नाहं तस्य कारणतां गच्छेयम् , इति विचार्य जरसादेशे कारणतां न गच्छति , तेन ' निर्जरैः ' इत्येव रूपं भवति ।

तथैवात्र घटमिथ्यात्वमपि 'स्वसाधितेन घटसत्यत्वेन स्वयं नष्टं भवेयम्' इति भाविनं स्वपुत्रेण स्वनाशं विलोक्य घटसत्यत्वरूपस्वपुत्रोत्पादनं प्रति निमित्ततां न गच्छति' को हि लोके स्वनाशकं जनयितुं समीहते ? को हि लोके जानन्नपि स्वनाशकजननतो न निवर्तते ?

तथा च मिथ्यात्वेन कीदृशेनापि सत्यत्वं कथमपि साधितं भवितुं न शक्नोति इति ' मिथ्यात्वं मिथ्या ऽ मिथ्या वा ? इति प्रभृतिभवदीयकथनं सर्वं फलवेव ।

न च ,निमित्तापये नैमित्तिकस्याप्यपायः, इति नियम एवाप्रामाणिक, इति वाच्यम् '' पाघ्राध्मा स्थाम्नादाण् दृश्यर्ति सर्तिशदसदां पिबजिघ्रधमतिष्ठ मन यच्छ पश्यर्च्छ धौशीयसोदाः ' इति सूत्रे ' स्था ' इति दर्शनेन तादृशनियमस्य सिद्धत्वात्' अन्यथा 'ष्ठा गति निबृत्तौ' इति धातोः षकारस्य स्थाने धात्वादेः षः सः इत्यनेन सकारादेशे ' स्ठा ' इत्यस्यैव सम्पत्तेः ' स्था ' इति पठनस्यासङ्गतत्वापत्तेः ।

वस्तुतो दृश्यत्वहेतुना दृश्यमात्रस्यैव, घटादिमात्रस्य मिथ्यात्वादिमात्रस्य का कथा ? दृश्यान्तः पतितस्य स्वस्यापि मिथ्यात्वं तादृशमिथ्यात्वसिध्देरपि मिथ्यात्वं सहैव साध्यते, सर्वमिथ्यात्वसिध्देः सहैव सम्पन्नत्वात् एकेनापरस्य सप्पन्नताविपन्नताप्रसङ्ग एव नायातीत्युक्तस्य ब्रह्मातिरिक्त सर्वमिथ्यात्वानुपपन्नत्वाभात् न तद्वक्तासो वयमप्रामाणिका मन्तुं शक्यामहे ।

अतोऽस्माकमप्रामाणिकत्वाभावादस्मदुक्त' मूढदृष्टचतिमूढपदाभ्यां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुध्दयादिकमेव ग्राह्यम् इति नाविश्वसनीयम् ।

किंच, अस्माभि र्न स्वातन्त्र्येण तथोक्तम्, किन्तु हेतुपारतन्त्र्येण वयमविश्वास्या भवितुं शक्यामहे न परार्थानुमानादिहेतवः इति नास्मदीयं 'मूढदृष्टचतिमूढपदाभ्यां बुध्दयादिकमेव ग्राह्यम्' इतिं वचनमग्राह्यं भवितुमर्हति इति शम् ।

०००००००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुद्रकः–संस्कृतछापाखाना बेलझुण्डी , दाङ

Jayatu Sanskritam, Kathmandu, Nepal